सूर्यकान्तिस्ताम्रवर्णा ओड्रपर्याय इत्यपि ॥११०॥

प्रतीहास-शतप्रास-भण्डात-हयमारकाः ।
करवीरे करीरे तु क्रकरग्रन्थिलावुभौ ॥१११॥

प्रतीहासे ग्रन्थिलश्च करीरे दीर्घपत्रकः ।
उन्मत्तः कितवो धूर्तो धुस्तूरः कनकाह्वयः ॥११२॥

---

1. मण्डला नवमालिका B

मातुलो मदनश्चास्य फले मातुलपुत्रकः ।
उत्क्षिप्तः प्रमदो मारः खरदूषण इत्यपि ॥११३॥

।धुस्तूरफले।

फलपूरो बीजपूरे रुचको मातुलिङ्गके ।
फलपूरे बृहच्चित्तो रुचके स्पृह्य इच्छुकः ॥११४॥ होनङ्ग ।

समीरणो मरुवकः प्रस्थपुष्पः फणिज्जकः ।
जम्बीरः खरपत्रश्च पत्रपुष्पः शिवालयः ॥११५॥ रक्ततुलसी ।

पर्णासे तुलसी वृन्दा कुठिञ्जरकुठेरकौ । तुलसी ।
श्वेतच्छदोऽर्जको गन्धपत्रः पाता कुठेरकः ॥११६॥ बागुइ ।

कृष्णार्जकः कृष्णवल्ली वानलो वायवोऽपि सः ।कृष्णबाबुइ।
पलङ्कषा मुण्डितिकाऽलम्बुषा श्रावणी जहा ॥११७॥

कदम्बपुष्पी दूतघ्नी कादम्बा श्रवणाह्वति । मुण्डीरी ।
पाठी द्वयाग्निर्ह्रस्वाग्निश्चित्रको वह्निसंज्ञकः ॥११८॥

अर्काह्ववसुकास्फोतगणरूपविकीरणाः ।
मन्दारश्चार्कपर्णोऽत्र, शुक्लेऽलर्कप्रतापसौ ॥११९॥

वसुके कर्णकटुकौ शुक्लार्के शम्भुवेधसौ । आकन्द ।
शिवमल्ली पाशुपतः एकाष्ठीला वको वसुः ॥१२०॥

बकवृक्षे ।

मुनिद्रुमो वृकोऽरण्यो वक्रपुष्पः सुनालकः ।
वन्दा वृक्षादनी वृक्षरुहा जीवन्तिकेत्यपि ॥१२१॥

वशिनी पुत्रिणी वश्या परपुष्टा पराश्रया । परसांभा ।
वत्सादनी छिन्नरुहा गुडूची तन्त्रिकाऽमृता ॥१२२॥

जीवन्तिका सोमवल्ली विशल्या मधुपर्ण्यपि ।
पित्तघ्नी वातरक्तारिः सुवल्ली शुद्धवल्लिका ॥१२३॥

अमरा पामरोद्धारा व्रणहा विषपा गुडा । गुलञ्च ।
मूर्वा देवी मधुरसा भोरटा तेजनी स्रुवा ।।१२४।।

मधूलिका धनुः श्रेणी गोकर्णी पीलुपर्ण्यपि ।
धनुर्गुणाधनुःशाखा शिखरा दृढसूत्रिका ।१२५।।

शिखावती शिखरिणी धनुर्माला कुचण्डिका ।
पाठाऽम्बष्ठा विद्धकर्णी स्थापनी श्रेयसी रसा ।।१२६।।

एकाष्ठीला पापचेली प्राचीना वनतिक्तिका ।
महातिक्ता खड्गका सा जयन्ती छन्त्रवेशिका ।।१२७।।

टुण्टुका टङ्गिनी वेश्या बाला वेदि नपुंसकम् । आकनादी ।
कटुः कटुम्वराऽशोकरोहिणी कटुरोहिणी ।।१२८।।

मत्स्यपित्ता कृष्णभेदी चक्राङ्गी शकुलादनी ।
तिक्ता धन्वन्तरिग्रस्ता वान्तिदाऽम्वाऽम्बिका कुहा ।।१२९।।
कटकी ।।

आत्मगुप्ता जडाध्यण्डा कण्डूरा प्रावृषायणी ।
घृष्यप्रोक्ता शूकशिम्बिः कपिकच्छूश्च मर्कटी ।।१३०।।

शूका शूकवती कच्छूमती कण्डूकरी गुहा ।
सद्यःशोथा गात्रभङ्गा विषधर्मा कुलक्षया ।।१३१।। आलकुशी ।

चित्रोपचित्रा न्यग्रोधी द्रवन्ती शम्बरी वृषा ।
प्रत्यक्श्रेणी सुतश्रेणी रण्डा मूषिकपर्ण्यपि ।।१३२।।

पीतपर्णी पणावेष्टा श्वित्रघ्नी तिलकद्विषा । बिछूटी ।
अपामार्गः शैखरिको धामार्गवमयूरकौ ।।१३३।।

प्रत्यक्पर्णी कीशपर्णी किणिही खरमन्जरी ।
प्रत्यक्पुष्पी कीशपुष्पी धानुष्का लिङ्गवर्धिनी ।।१३४।।
आपाङ्ग ।

फञ्जिका ब्राह्मणी पद्मा भार्गी ब्राह्मणयष्टिका ।
अङ्गारवल्ली बालेयशाक वर्वरवर्धकाः ॥१३५॥

ब्रह्मदण्डश्च यज्ञाङ्गो ब्रणद्विद् स्थूलवर्त्मकृत् ।
पुत्रिणी मुखधौता च श्वासारिः शान्तृतिः स्त्रियाम् ॥१३६॥
वामनहाटी ॥

मञ्जिष्ठा विकसा जिङ्गी समङ्गा कालमेषिका ।
मण्डूकपर्णी भण्डीरी भण्डी योजनवल्ल्यपि ॥१३७॥

रक्तयष्टिः कामदूती शङ्करी बुद्धिनामिका । मञ्जिष्ठा ॥
यासो यवासो दुःस्पर्शो धनुर्यासः कुनाशकः ॥१३८॥

रोदनी कच्छुराऽनन्ता समुद्रान्ता दुरालभा । दुरालभा ।
गिरिकर्णी पद्ममुखी प्रपुन्ना फञ्जिकासुता ॥१३९॥

इदंकार्या भणा ध्वाना मालिनी सिंहनादिका ।
पृश्निपर्णी पृथक्पर्णी चित्रपर्ण्यङ्घ्रिवल्लिका ॥१४०॥

क्रोष्टुविन्ना सिंहपुच्छी कलशिर्धवनिर्गुहा ।
नादेयी तनया शीर्णलाला[1]च्युर्वी रसा लिहा ॥१४१॥

चक्रकुल्या चक्रपर्णी खगशत्रुर्वरम्बरा । चाकुल्या ।
निदिग्धिका स्पृही व्याघ्री बृहती कण्टकारिका ॥१४२॥

प्रचोदनी कुली क्षुद्रा दुःस्पर्शा राष्ट्रिकेत्यपि ।
कासघ्नी कण्टकश्रेणी दुःस्पर्शा सा प्रपूरिका[2] ॥१४३॥

क्षुद्रहिङ्गुनिका भीरुः क्षौद्रपर्णी कुरुः पुमान् ॥ कण्टकारी ॥
नीली काला क्लीतळिका ग्रामीणा मधुपर्णिका ॥१४४॥

1. शीर्णमाला VS
2. प्रपूरका A

रञ्जनी श्रीफली तुत्था तूली दोला च नीलिनी ।
मेघवर्णा वणिक्बन्धुः रसिता कुत्सनाऽक्लिका ॥१४५॥
नीलीवृक्षे ॥
अवलगुजः सोमराजी सुवल्लिः सोमवल्लिका ।
कालमेषी कृष्णफला वागुजी पूतिफल्यपि ॥१४६॥
कटुः क्रिमिघ्नी शूलोत्था वेजानी जानकी त्रयी ।
मसनं मासनं छेषुः पुमान् पानीयमूलकम् ॥१४७॥
सोमराजी ॥
कृष्णोपकुल्या वैदेही मागधी चपला कणा ।
ऊषणा पिप्पली शौण्डी चञ्चला च महौषधम् ॥१४८॥
विश्वा विधात्री एरण्डी[1] सिञ्चिता नन्दकिः स्त्रियाम् ।
पिप्पली ।
इभोषणायां स्थूला स्यात् शनकावलिरुत्कुता[2] ॥१४९॥
कपिवल्ली कोलवल्ली श्रेयसी वशिरः पुमान् । गजपिप्पली ।
चव्यन्तु चविकं चोभ्यं श्लेष्महं सपुरन्दरम् ॥१५०॥ चइ ॥
रक्तिः काकादनी काकचिञ्ची गुञ्जा च कृष्णला ।
कुचिका बहुविस्तीर्णा कुञ्चिका रिपुघातिनी ॥१५१॥ कुचइ ।
पलङ्कषा त्विक्षुगन्धा श्वदंष्ट्रा स्वादुकण्टकः ।
गोकण्टको गोक्षुरको वनशृङ्गाट इत्यपि ॥१५२॥
गोखुरो गोखुरिर्ज्ञेयः पदन्यासो धनस्यकः । गोखुरि ।
विश्वा विषा प्रतिविषाऽतिविषोपविषाऽरुणा ॥१५३॥
शृङ्गी महौषधं पीता संविषा प्रविषाऽपि च । आतइच ।
कोमला गर्भिणी क्षीरा क्षीरावी दुग्धिका तथा ॥१५४॥
क्षीराइ ।

---

1. त्वैरण्डी (?) एरण्डा -VS
2. त्न्कता -VS

शतमूली बहुसुताऽभीरुरिन्दीवरी वरी ।
ऋष्यप्रोक्ता भीरुपत्री नारायण्यः शतावरी ॥१५५॥
अहेरुः शम्बरी स्पर्शशुद्धा काञ्चनकारिणी ।
महाशीता रसाला स्याद् वातारिर्मदभञ्जिजनी ॥१५६॥
शतमूली ।
द्वितीयाभा च पीतद्रुकालेयकहरिद्रवः ।
दर्वी पचम्पचा दारुहरिद्रा पर्जनीत्यपि ॥१५७॥ दारुहरिद्रा ।
वचोग्रगन्धा षड्ग्रन्था गोलोमी शतपर्विका ।
स्वरालुर्गालिनी काङ्गा सुपद्मा वशिरः पुमान् ॥१५८॥ वच ।
शुक्ला हैमवती, वैद्यमातृसिंह्यौ तु वासका ।
वृषोऽटरूपः सिंहास्यो वासको वाजिदन्तकः ॥१५९॥
कसनोत्पाटनो वैद्यप्रामाण्यमलकौ[1] तथा । वासक ।
मरिचं कोलकं कृष्णमूषणं धर्मपत्तनम् ॥१६०॥
वेल्लजं स्रावकं कालं कोलद्रव्यमापणम् । मरिच ।
जीरको जरणोऽजाजो कणा कृष्णसखी दृता ॥१६१॥ जीरा ।
जीरके कृष्णवर्णे तु तिलापत्या पतिम्वरा ।
स्वषवी[2] कारवी पृथ्वी पृथुः कालोपकुञ्चिका ॥१६२॥
कृष्णजीरा ।
आर्द्रकं शृङ्गवेरं स्यात् शृङ्गारं ग्रन्थिलन्तथा । आदा ।
धनिका तण्डुला धन्या भिदा छत्रा वितुन्नकम् ॥१६३॥
कुस्तुम्बुरू च धन्याकमथ, शुण्ठी महौषधम् ।
स्त्रीनपुंसकयोर्विश्वं नागरं विश्वभेषजम् ॥१६४॥
उग्रगन्धञ्च शुष्कार्द्रं शुण्ठं वचनमेव च । शुण्ठी ।
सहस्रवेधि जतुकं बाह्लीकं हिङ्गु रामठम् ॥१६५॥
षषालं शरणं बिल्वं जातुकं रमठध्वनिः । हिंगु ।
तत्पत्री कारवी पृथ्वी बाष्पिका कवरी पृथुः ॥१६६॥

1. प्रामाद्य
2. सुषवी (?)

पृथुका करवी पर्णी वाटिका सरिका स्रुता । तत्पत्रचाम् ।
निशाह्वा काञ्चनी पीता हरिद्रा वरवर्णिनी ॥१६७॥

सुवर्णवर्णा सच्चारा सुन्दरी युवतिस्तथा । हरिद्रा ।
आस्फोता गिरिकर्णी स्याद् विष्णुक्रान्ताऽपराजिता ॥१६८॥

अभया वैष्णवी दुर्गा महापुष्पा महेश्वरी । अपराजिता ।
इक्षुगन्धा तु काण्डेक्षुः कोकिलाक्षेक्षुरक्षुराः ॥१६९॥

प्लीहाशत्रुः प्लीहशत्रुरेतौ द्वौ तत्र कीर्त्तितौ ॥ कुलेखाड़ा ॥
शालेयः स्यात् शीतशिवः छत्रा मधुरिका मिसी ॥१७०॥

मिश्रेया सुरसा पेया तृषाहा स्कन्धवन्धना । महुरी ।
स्नुषा सुधा च सीहुण्डी वज्रद्रुः स्नुक् स्नुही गुडा ॥१७१॥

समन्तदुग्धा नागद्रुर्नागरी व्हुदुग्धिका । सिज ।
जन्तुघ्नं भस्मकं वेल्लममोघा चित्रतण्डुला ॥१७२॥

तण्डुलश्च क्रिमिघ्नश्च विडङ्गं पुंनपुंसकम् । विडङ्ग ।
वला वाट्यालको, घण्टारवा तु शणपुष्पिका ॥१७३॥

बलायां बलिनी ज्ञेया सुवर्णा चातसीसमा । वाडाला ।
मृद्वीका गोस्तनी द्राक्षा स्वाद्वी मधुरसेति च ॥१७४॥

यक्ष्मघ्नी मधुरा चापि तस्याः पर्याय इत्यपि । किचमिच ।
सर्वानुभूतिः सुवहा त्रिपुरा त्रिवृता त्रिवृत् ॥१७५॥

त्रिभण्डी रेचनी भङ्गा कलिङ्गा परिपाकिनी । तेडडी ।
नीलिनी विपुषा श्यामा पालिन्दीं च सुषेणिका ॥१७६॥

काला मसूरविदलाऽर्धचन्द्रा कालमेषिका । कृष्णतेडडी ।
मधुकं क्लोतकं यष्टिमधुका मधुयष्टिका ॥१७७॥

वादलं मुनिभिः प्रोक्तं मधुयष्टेश्च नामकम् । यष्टिमधु ।
विदारी क्षीरशुक्लेक्षुगण्डा क्रोष्ट्री च वासिता ॥१७८॥

अन्या क्षीरविदारी स्यान्महाश्वेतर्क्षगन्धिका ।
विदार्यां भूमिकूष्माण्डः पर्यायः परिकीर्त्तितः ॥१७९॥

लाङ्गली शारदी तोयपिप्पली शकुलादनी ।
लाङ्गल्यां कथिता वैद्यैः जलभूः कञ्चटन्तथा ॥१८०॥ कञ्चेट ।

खराह्वा कारवी दीप्या मयूरो लोचमस्तकः ।
क्षुद्रशीर्षः प्रियतमः सन्दीप्यो दीपनोऽपि च ॥१८१॥
मयूरशिखावृक्षे ।

गोपी श्यामा सारिवा स्यादनन्तोत्पलसारिवा ।
गोपिनी कपिला चिह्नधारिणी दृढबन्धिनी ॥१८२॥
श्यामालता ।

योग्यमृद्धिः सिद्धिलक्ष्म्यौ वृद्धेरप्याह्वया इमे ।
ऋद्धेर्नाम च सम्पत्तिः, वृद्धेराख्या च वर्द्धिनी ॥१८३॥
ऋद्धिनाम्नि द्रव्ये ।

कदली वारणबुसा रम्भा मोचांशुमत्फला ।
काष्ठीलाततपत्री च सुपुष्पी नगरौषधिः ॥१८४॥ कदली ।

मुद्गपर्णी शिम्बिपर्णी काकमुद्गा सहेत्यपि ।
क्षुद्रसहा[1] च काम्बर्धी सूर्यपर्णी मृषातिका ॥१८५॥ मुगानी ।

वार्त्ताकी हिङ्गुली सिंहीं भण्टाकी दुष्प्रधर्षिणी ।
वातिङ्गनश्च वार्ताकुर्वार्ताको रक्तवर्धनः ॥१८६॥ बेगुन ।
नाकुली सुरसा रास्ना सुगन्धा गन्धनाकुली ।
नकुलेष्टा भुजङ्गाक्षी छत्राकी सुवहा च सा ॥१८७॥

1. क्षुद्रासहा–B

नकुली नन्दगोपेता प्राचीना धूर्त्तमानुषा । रास्ना ।
विदारिगन्धांशुमती शालपर्णी स्थिरा ध्रुवा ॥१८८॥

महौषधिः कङ्कशत्रुः पृश्निपर्णी तथा स्मृता । सालपानि ।
तुण्डिकेरी समुद्रान्ता कार्पासी बदरेति च ॥१८९॥

महारुद्रा वसनभूः तुण्डिकेरिः सुसम्मता । कार्पास ।
त्रपरी बहुमूर्त्तिश्च भारद्वाजी वनोद्भवा ॥१९०॥ बनकापास ।

वनभुक्श्रृङ्गकः शृङ्गी ऋषभो वृषभो वृषः ।
ऋषभाख्यगन्धद्रव्ये ।
गाङ्गेरुकी नागबला झषा ह्रस्वगवेधुका ॥१९१॥

गवेशको गोपवल्ली भल्लपुच्छी महेति च । गोरक्षचाकुल्या ।
धामार्गवो घोषकः स्यात् महाजाली सपीतकः ॥१९२॥

गोहितो घोषके प्रोक्ता महाजालिनि जालकः । घोषलता ।
ज्योत्स्नी पटोलिका जाली, नादेयी भूमिजम्बुका ॥१९३॥

ज्योत्स्निकायां भवेत् काला, नादेय्यां नल्लवर्त्मगा ।
स्याल्लाङ्गलिक्यग्निशिखा, काकाङ्गी काकनासिका ॥१९४॥

काकाङ्गयां काकजङ्घा स्यात्, लाङ्गलिक्यां युषा तृषा ।
गोधापदी तु सुवहा, मुशली तालमूलिका ॥१९५॥

गोधापद्यां समाख्याता त्रिफला हंसपादिका । गोहालिया ।
तालमूल्यां तीर्णपदी टुनाका परिकीर्त्तिता ॥१९६॥ तालमूली ।

अजशृङ्गी विषाणीस्यात्, गोजिह्वा दार्विके समे ।
अजशृङ्ग्यां भवेत् शृङ्गी श्रृङ्गला चारिवाक्षता ॥१९७॥
। काकड़ाश्रृङ्गी ।

समाह्वा कुरसा विश्या गोजिह्वायाञ्च दर्विका । गोजिया ।
ताम्बूलवल्ली ताम्बूली नागवल्ल्यप्यथ द्विजा ॥१९८॥

हरेणू रेणुका कौन्ती कपिला भस्मगन्धिनी ।
ताम्बूल्यां कटुकाऽभीष्टा देवाभीष्टा गृहाशया ॥१९९॥
रेणुकायां भवेत् ज्योत्स्नी कृतान्ता खरनादिनी ।
वरावरमुखी पुच्छाऽर्शोघ्नी श्यामा वरत्करी ॥२००॥
। रेणुकाख्यगन्धद्रव्ये ।
एलवालुकमैलेयं सुगन्धि हरिवालुकम् ।
वालुकञ्चाथ, पालङ्क्या मुकुन्दः कुन्दुकुन्दुरु ॥२०१॥
वालुकं एलवालुकाख्यगन्धद्रव्यं,
तृणौषधं पीलुपर्णं हरिभद्रे च वालुके ।
पालङ्क्यायाञ्च पालङ्की खोटी शत्रुसुधा द्विजा ॥२०२॥
पालङ्क्या कुन्दुरु खोटी ।
बालं ह्रीबेरबर्हिष्ठोदीच्यं केशाम्बुनाम च ।
बाला च रमणी रामा वन्ध्या कामकलाऽपि च ॥२०३॥ बाला ।
कालानुसार्यं वृद्धाश्व[1]पुष्प शीतशिवानि च ।
शैलेयं, तालपर्णी तु दैत्यागन्धकुटी मुरा ॥२०४॥
गन्धिनी, गजयक्ष्मा तु सुवहा सुरभी रसा ।
महेरुणा कुन्दुरुकी शल्लकी ह्लादिनीति च ॥२०५॥
शैलेयं शैलजं शैलं शिलाजं शीतपुष्पकम् ।
शैलजनाम्निगन्धद्रव्ये
तालपर्ण्यां तालपर्णं तालाख्या चोत्खला खशा ॥२०६॥
मुरानाम्नि गन्धद्रव्ये ।
कुन्दुरुक्यां महाघोषा शिलाकर्णी हयाशना ।
शल्लकीनामवृक्षविशेषे ।
अग्निज्वाला सुभिक्षे तु धातकी धातृपुष्पिका ॥२०७॥
धात्रीश्वरी वह्निकरी जूषणं क्लीबलिङ्गकम् । धाईफूल ।
पृथ्वीका चन्द्रबालैला निष्कुटिर्बहुलाऽथ सा ॥२०८॥

1. वृद्धाश्म (?)

सूक्ष्मोपकुञ्चिका तुत्था कोरङ्गी त्रिपुरा त्रुटिः ।
पृथ्वीकायां प्रिया धान्धा निदिग्धा छर्दिकारिपुः ॥२०९॥

एलाइच ।

त्रुटौ च मागधी मेषा वृष्टिघ्नी भृङ्गपर्णिका ।

गुजरुटि एलाइच ।

लवङ्गं देवकुसुमं श्रीसङ्गं तोयधिप्रियम् ॥२१०॥

मादनं रेचनं वश्यं सुपुष्पं ग्रहणीहरम् । लवङ्ग ।
जायकं झावुकं संज्ञं प्रचेलं प्रविरः पुमान् ॥२११॥

कालीयकञ्च कालानुसार्यञ्चाथ समर्थकम् ।

जायकादि सप्तपीतकाष्ठे ।

वंशिकागुरु राजार्हं लोहक्रिमिजजोङ्गकम् ॥२१२॥

लघुनाम क्षतहरं पारुष्यं हंसदाहनम् । अगुरु ।
कालागुर्वगुरुः स्यात्तन्मङ्गल्या मल्लिगन्धि यत् ॥२१३॥

शुक्लागुरुः क्रथनकं मङ्गल्यायां मनाक्करम् ।
समुद्रान्तं नवं जातीकोषं जातीफलं तृखम् ॥२१४॥ जायफल ।

गुडत्वचं राजभोग्यं जातीकोषं द्विधात्मकम् । जावित्री ।
यक्षधूपः सर्जरसो रालसर्वरसावपि ॥२१५॥

बहुरूपोऽप्यथ वृकधूपकृत्रिमधूपकौ ।
यक्षधूपे वाह्निगन्धो मेरुकः सूत्रमध्यभूः ॥२१६॥ धूना ।

वृकधूपे भक्तकरो गिरिः स्यात् समगन्धकः । कृत्रिमधूपे ।
तुरुष्कः पिण्डकः सिल्हो यावनोऽप्यथ पायसः ॥२१७॥

श्रीवासो वृकधूपोऽपि श्रीपिष्टः सरलद्रवः ।
चतुर्थः सिल्हके प्रोक्तः श्रीवासे पद्मदर्शनः ॥२१८॥

मृगनाभिर्मृगमदः कस्तूरी चाण्डजं तथा । मृगनाभि ।
काकोलं कोलकं गन्धव्याकुलं तैलसाधनम् ॥ २१९॥

कक्कोलकं कोषफलमथ कर्पूरमस्त्रियाम् । काकोलादि षट् खाटासी ।
घनसारश्चन्द्रसंज्ञः सिताभ्रो हिमवालुका ॥२२०॥

धवलं वालुका चापि तस्य संज्ञे उदाहृते । कर्पूर ।
काकोली वकुली वेश्या क्षीरकाकोलिकाऽष्टमी ॥२२१॥[1]

मेदो वपो महामेदो महावप उदाहृतः ।[2]
जीवके जीवनो जीवो निधिः स्थाणुः प्रकीर्त्तितः ॥२२२॥
। जीवकनाम्निगन्धद्रव्ये ।

गन्धसारो मलयजो भद्रश्रीश्चन्दनोऽस्त्रियाम् ।
भद्रश्रियः सारगन्धो हिमः शुभ्रः सुरोत्तरः ॥ २२३॥ चन्दन ।

गोशीर्ष चन्द्रकान्तश्च सर्पेष्टं वरचन्दने ।
सुशीतलं चन्दनं यत् तैलपर्णिकमुच्यते ॥२२४॥

उभयौ[3] तस्य पर्यायौ सोमयोनिशिलोद्भवम् ।
पीतसारञ्च तत्पीतं सुशीलं हरिचन्दनम् ॥२२५॥ हरिचन्दने ।

कालीयं कालिकं[4] कालं कालीसकहरिप्रियम् । कृष्णचन्दने ।
ताम्राभं ताम्रसारं स्यात् रञ्जनं रक्तचन्दनम् ॥२२६॥
रक्तचन्दने ।

---

1. पूर्वं त्रयं काकोला, शेषद्वयं क्षीरकाकोला ।
2. आद्यं द्वयं मेदे, शेषद्वयं महामेदे ।
3. उभो तु (?)
4. कालकं-B

रक्तं पतङ्गं पत्राङ्गं रञ्जनञ्च कुचन्दनम् । चन्दन भेदे ।
व्याधिः कुष्ठं पारिभाव्यं व्याप्यं[1] पाकलमुत्पलम् ॥२२७॥

कौबेरं भास्वरं दुष्टं कदाख्यं व्याप्यमित्यपि । कूठ ।
शङ्खिनी चोरपुष्पी स्यात् केशिन्यथ वितुन्नकः ॥२२८॥

झाटाऽमलाऽज्झटा[2] ताली शिवा तामलकीति च ।
शङ्खिन्यां शङ्खिका चोरा, झाटायान्त्वपि झाटिका ॥२२९॥
शङ्खिनी चोरबहुली, झाटा भूम्यामलकी ।

प्रपौण्डरीकं पुण्डर्यमथ, तुन्नः कुबेरकः ।
कुलिः कच्छूः कान्तलको नन्दीवृक्षोऽथ, राक्षसी ॥२३०॥

चण्डा धनहरी क्षेमदुष्पत्रगणहासकाः ।
पुण्डर्ये पुण्डरीकाक्षं विकसं जिङ्गनं त्रयम् ॥२३१॥
पुण्डरीकलतायाम् ।

तुन्ने कलिर्नकः कारः शस्यध्वंसी समासवान् ।
नन्दीवृक्षोऽश्वत्थसदृशः ।
राक्षस्यां निकषा भीमा झञ्झा ना क्षितिरित्किला ॥२३२॥
रोचनाम्नि गन्धद्रव्ये ।

व्याडायुधं व्याघ्रनखं करजं चक्रकारकम् ।
भरुजं मण्डन्नं शून्यं शिष्कं पर्याय इत्यपि ॥२३३॥
व्याघ्रनखाख्य गन्धद्रव्ये ।

शुषिरा विद्रुमलता कपोताङ्घ्रिर्नटी नली ।
काव्यजा किम्भवा चापि निद्रालुः काकुभादवी ॥२३४॥
नलीनाम्नि गन्धद्रव्ये ।

1 बाप्यं (?)
2. झटा-B

धमन्यञ्जनकेशी च हनुर्हट्टविलासिनी ।
हरिणाक्षी चिल्लभक्ष्या कुमुदा हस्तिनीत्यपि ।।२३५।।
। हडविलासिनी ।

शुक्तिः शङ्खः खुरः कोलदलं नखमथाढकी ।
काक्षी मृत्स्ना तुवरिका मृत्तालकसुराष्ट्रजे ।।२३६।।

गन्धराजी नखे प्रोक्ता काक्ष्यान्तु कपिलद्रुमः ।
भारवृक्षो मरुत् श्यामा श्वसिनी पिण्डिताङ्गिका ।।२३७।।
नखं, नखीति काक्षी चम्बीति ।

कुटन्नटं दशपुरं वालेयं परिपेलवम् ।
प्लवगोपुरगोनर्दकैवर्तीमुस्तकान्यपि ।।२३८ ।।

वनजं म्रातनं वन्यं मुस्थाभं पशुपल्ललम्[1] । कैवर्तीयुता ।
ग्रन्थिपर्णं शुकं बर्हिपुष्पं स्थौणेयकुक्कुरे ।।२३९।।

ग्रन्थिलं बर्हिकुसुमं ग्रन्थिबर्हीति कस्यचित् । गांठियान ।
मरुन्माला तु पिशुना पृक्का देवी लता लघुः ।।२४०।।

समुद्रान्ता वधूः कोटिवर्षा लङ्कापिकेत्यपि ।
लङ्कापिका चिरञ्जीवा युवती रतिसत्वरा ।।२४१।। पिडिङ्ग।

तपस्विनी जटामांसी जटिला लोमशा मिसी ।
मांसी बुधा विज्ञबुद्धिर्मनः सन्न्यास इत्यपि[2] ।।२४२।।
जटामांसी ।

त्वक्पत्रं सूत्कटं भृङ्गं त्वचं चोचं वराङ्गकम् ।
गुडत्वचं गुडत्वक् च त्वक्सारं परिकीर्तितम् ।।२४३।। गुडत्वक् ।

---

1. पल्वलम्-VS

2. मन इति पुंलिङ्गशब्दः, एवं सन्न्यासश्च ।

सुपत्रं तेजपत्रञ्च पत्राख्यं पाकरञ्जनम् । तेजपात ।
कर्पूरकः[1] सुम्पलुण्ठः काल्पको वेधमुख्यकः ॥२४४॥

द्राविडको दरिद्रश्च हरिद्राभः सुनाकुतः । कर्पूरके ।
मारिषो गुडमूलश्च तण्डुलीयोऽल्पमारिषः[2] ॥२४५॥

कासमर्दश्च कुष्ठारिः शालिञ्चो दीपनो मत.[3] ।
ग्रीष्मसुन्दरको घूर्णो मासरो लुण्ठकोऽपि च ॥२४६॥[4]

कञ्चटः कञ्चडः काचः चक्रमर्दोऽपि चाम्बुणः ।[5]
शृगालकण्टकः फेरुः, क्षतघ्नः श्वसुतोऽसरुः ॥२४७॥[6]

विशल्यग्निशिखानन्ता फलिनी[7] शक्रपुष्प्यपि ।
अमूला निस्पृहा चापि मानिनी विष्णुवल्लभा ॥२४८॥
अग्निशिखा ।

स्यादृक्षगन्धा छगलान्त्र्यावेगी वृद्धदारुकः ।
जुञ्जो[8] ब्राह्मी तु मत्स्याक्षी, वयःस्था सोमवल्लरी ॥२४९॥

जुञ्जे स्यात् क्षतविध्वंसी, वयःस्थायां सरस्वती ।
जुज्जे विध्नभक क्रमङ्की सोमलता ।
पटुपर्णी हैमवती स्वर्णक्षीरी हिमावती ॥२५०॥

---

1. कर्चूरकः (?)
2. मारिषः शाकभेदः, तण्डुलीयो लोके चालूनाट्या ।
3. प्रथमद्वयं कालकासन्दा (कासुन्धा-B), शेषद्वयं शालिचा ।
4. प्रथमद्वयं गीमा, शेषद्वयं नट्या ।
5. कञ्चटादित्रयं काँचडा, चक्रमर्दादिद्वयं चाकन्दा ।
6. प्रथमद्वयं शृगालकण्टके, शेषत्रयं कुकुरशाँखा ।
7. हलिनी (?)
8. 'जुङ्गः' इत्यमरः ।

स्वर्णपुष्पी विशल्या च बिम्वाला चापरापरा । स्वर्णक्षीरा ।
ब्रह्मी तु ब्राह्मणी ब्राह्मी ब्रह्मचर्यवती तथा ।। ब्रह्मी ।।२५१।।

हयपुच्छी तु काम्बोजी माषपर्णी महासहा ।
कृष्णवृन्ता सिंहपुच्छी पाण्डुलोमशपर्णिनी ।।२५२।। माषानी ।

तुण्डिकेरी रक्तफला विम्बिका पीलुपर्ण्यपि ।
तुण्डिकेशीतिसंज्ञा च तस्याः सम्यक् प्रलिख्यते ।।२५३।।

वर्वरा कबरी तुङ्गी खरपुष्पाजगन्धिका ।
मेषालुर्वडवा वर्वा वर्वरी स्थानचञ्चला ।।२५४।। वर्वरावृक्षे ।

एलापर्णी तु[1] सुवहा एला युक्तरसा च सा ।
रसयुक्ता सदातोया जृम्भिनी दीर्घवृन्तिका ।।२५५।।
एलापर्ण्याम् ।

चाङ्गेरी चुक्रिका दन्तशठाऽम्बष्ठाऽम्ललोणिका ।
चुक्रिका दशनाढ्या च चक्रपत्री च चन्द्रजा ।।२५६।। आमरुल ।

सहस्रवेधी चुक्रोऽम्लवेतसः शतवेध्यपि ।
अत्यम्लो बृद्धराजश्च द्वावेतौ परिकीर्त्तितौ ।।२५७।। अम्लवेतसे ।

नमस्कारी गण्डकारी समङ्गा खदिरीत्यपि ।
क्षुरिणी शूकराक्रान्ता लोहिता मधुपर्णिका ।।२५८।। वराक्रान्ता ।

जीवन्ती जीवनी जीवा जीवनीया मधुश्च सा ।
मधुस्रावा तीक्ष्णगन्धा गन्धाला जीविका जया ।।२५९।।
जिँयति ।

त्रैलोक्यविजया भङ्गा विजयेन्द्राशनं जया । सिद्धि ।
किराततिक्तो भूनिम्बो ऽनार्यतिक्तोऽथ सप्तला ।।२६०।।

1. एलापर्णीति-B

विमला सातला भूरिफेना चर्मकषेत्यपि ।
किराततिक्ते कैरातं किरातं काण्डतिक्तकः ॥२६१॥[1]

सप्तलायां मृत्खनिनी चर्मकस्त्री त्रिदालिका । चामारकषा ।
मुकूलकः सर्पदष्टः[2] सेतुभेदी दशानिकः ॥२६२॥

निकुम्भो दन्तिका प्रत्यक्श्रेण्युदुम्वरपर्ण्यपि । दन्ती ।
अजमोदा तूग्रगन्धा ब्रह्मदर्भा यमानिका ॥२६३॥

दीपको भूतिको दीप्यो यवानी रसमञ्जिगनी । यमानी ।
मूले पुष्करकाश्मीरपद्मपत्राणि पौष्करे ॥२६४॥
। पुष्करमूलाग्य्य वणिगद्रव्ये ।

ग्रन्थिकं पिप्पलीमूलं चटिकं चटिकाशिरः ।
शेखरं शिग्रुमूलं स्यादिक्षुमूलन्तु मोरटम् ॥२६५॥

शिग्रुजं श्वेतमरिचं शिग्रुबीजं गरात्मकम् ।
अव्यथाऽतिचरा पद्मचारटी पद्मचारिणी ॥२६६॥

अस्थियोगा सिहादेवा तरणी तर्पिणी च सा ॥ पद्मचारिण्याम् ।
अस्थिभङ्गो ह्यसह्यास्थि चतुःशिरशिरालकौ ॥२६७॥
। हाडभाङ्गा ।

काम्पिल्यः कर्कशश्चन्द्रो रक्ताङ्गो रोचनीत्यपि ।
अङ्गरक्तः पिकाक्षश्च रोचनी लघुपत्रकः ॥२६८॥
। गुण्डारोचनी ।

प्रपुन्नाडस्त्वेडगजो दद्रुघ्नश्चक्रमर्दकः ।
पद्माट उरणाख्यश्च तुबरी शिम्ब इत्यपि ॥२६९॥
। रक्त चाकन्दा ।

---

1 किराततिक्तश्चिरा ता ।

2. सर्पदंष्ट्रः VS

भूकन्दकः पलाण्डुश्च नीचभोज्यो निकेतनः। पेंयाज।
लतार्कदुर्द्रुमौ तत्र हरितेऽथ महौषधम् ॥२७०॥

लशुनं गृञ्जनारिष्ट महाकन्दरसोनकाः।
शोणहो रसुनश्चापि पर्यायः परिकीर्त्तितः ॥२७१॥ रसुन।

पुनर्नवा तु शोथघ्नी, वितुन्नं सुनिषण्णकम्।
पुनर्नवायां पूर्णाशा, वितुन्ने स्वप्नकृत् स्मृतम् ॥२७२॥

स्याद्वातकः शीतलोऽपराजिताऽसनपर्ण्यपि।
देवा सुदीर्घधर्मा च खेदिनी तृषितोत्तरा ॥२७३॥

। असनपर्ण्याम्।

पारावताङ्घ्रिः कटभी पिण्या ज्योतिष्मती लता।
वृन्तिता[1] सेनुनानुः स्यात् शणपर्णी महासहा ॥२७४॥ फटकी।

वार्षिकं त्रायमाणा स्यात् त्रायन्ती वलभद्रिका।
बलाका कथिता तस्याः संज्ञैका मुनिभिः पुरा ॥२७५॥

बलभादनी।

विष्वक्सेनप्रिया गृष्टिर्वाराही बदरेत्यपि।
बदरी सर्वतोभद्रा बिल्वमूला सुशीतिका ॥२७६॥

वाराहीनामवृक्षे।

मार्कवो भृङ्गराजः स्यात्, काकमाची तु वायसी।
मार्कवे कथितो भृङ्गः, काकमाच्यां घनाघना ॥२७७॥

मार्कवो भृङ्गराजः काकमाची गुडकाँडनी।

शतपुष्पा सितच्छत्राऽतिछत्रा मधुरा मिसी।
अवाक्पुष्पी कारवी च शताह्वा शीर्णपुष्पिका ॥२७८॥

शेलुपा।

1. वृन्तिका VS

प्रसारणी गन्धभद्रा गन्धाढ्या रसना तथा ।
तस्यां कटुम्भरा राजबला भद्रबलेति च ॥२७९॥ गन्धभादुल्या ।

जनी जतूका रजनी जतुकृच्चक्रवर्त्तिनी ।
संस्पर्शा विनुदा कङ्कावदोषः परिकीर्त्तितः ॥२८०॥

जनीनामगन्धद्रव्ये ।

खड्याकिनी शटी गन्धमूली षड्ग्रन्थिकेत्यपि ।
कर्चुरोऽपि पलाशोऽपि कारवेल्लः कठिल्लकः ॥२८१॥

सुषवी चाथ, कुलकं पटोलस्तिक्तकः पटुः ।
कारवेल्ले करेणुश्च, पटोले तिक्तभद्रकः ॥२८२॥

दीर्घा पटोलिका ख्याता धुन्धुला शुक्लराजिका ।
कूष्माण्डकस्तु कर्कारुः, इर्वारूः कर्कटी स्त्रियौ ॥२८३॥

कूष्माण्डे मांसलफलः, कर्कट्यां भिन्नगात्रिका ।
शीर्णवृन्तं बृहद्गोलं, त्रपुषं मूत्रलं त्रिखम् ॥२८४॥[1]

इक्ष्वाकुः कटुतुम्बी स्यात्तुम्ब्यलाबूरुभे सभे ।

इक्ष्वाकुस्तिक्तालाबूः ।

चित्रा गवाक्षी गोडुम्बा पिण्डिता परिपुष्करा ॥२८५॥

राजभेग ।[2]

इन्द्रवारुणिका शाला विशाला शक्रभूभवा । गोरक्षकांकुड़ ।
अर्शोघ्नः सूरणः कन्दो, गण्डीरस्तु समष्ठिला ॥२८६॥

सूरणे कथितं मूलं, गण्डीरे वृत्रभोजनः ।

सूरनओल, गण्डीरशमठ ।

कट्वी तु पिच्छिला प्रोक्ता, विस्तीर्णपर्णमानके ॥२८७॥

---

1. प्रथमद्वयं तरमूज, शेषत्रयं शषा ।
2. राजगम-B

अलुके[1] मधुमूलञ्च हिङ्गुलं परिकीर्त्तितम् ।
मध्वालुकं खण्डकालु-पिण्डालु-कुञ्जरालुकम् ॥२८८॥

चत्वारोहयालुभेदाश्च पुरा मुनिभिरीरिताः ।
कलम्ब्युपोदिका स्त्री तु मूलकं हिलमोचिका ॥२८९॥

वास्तुकं शाकभेदाः स्युः दूर्वा तु शतपर्विका ।
सहस्रवीर्या भार्गव्यो रूहाऽनन्ताथ, सासिता ॥२९०॥

गोलोमी शतवीर्या च, गण्डाली शकुलाक्षकः ।
उत्पादिका[2] त्रिवृत्पर्णी, हेलञ्ची हिलमोचिका ॥२९१॥

अमरा शतधासारा दूर्वायां परिकीर्त्तिता ।
महौषधिश्च गोलोम्यां रक्तघ्नी रक्तपित्तहा ॥२९२॥

कुरुविन्दो मेघनामा मुस्ता मुस्तकमस्त्रियाम् ।
अथोऽकाण्डं काण्डहीनं गाङ्गेयं भद्रमुस्तकम् ॥२९३॥ मुथा ।

स्याद् भद्रमुस्तको गुन्द्रा, चूडाला चक्रलोच्चटी ।
गुन्द्रायां रमणी कान्ता, चूडालायां चलत्पथः ॥२९४॥
गुन्द्रा नागरमुथा, चूडाला छेंडामुथा ।

वंशे त्वक्सारकर्मारत्वचिसारतृणध्वजाः ।
शतपर्वा यवफलो वेणुमस्करतेजनाः ॥२९५॥

कीचकः सर्वतोभद्रो वह्निगर्भो बृहत्तृणः । वंश ।
वेष्टवंशो कण्टकिलस्तण्डुलौधो नृपप्रियः ॥२९६॥

ब्रह्मयष्टिः सपलारिर्बहुसन्ततिरामुपः । बेडुबाँस ।
वंशाङ्कुरे समाख्यातो द्विहीनश्च करीरकः ॥२९७॥

---

1. आलुकं (?)
2. उपोदिका (?)

कुञ्चिका कञ्चिका घृष्णुः शाखायां मष्करस्य तु ।
वेणवः कीचकास्ते स्युर्ये स्वनन्त्यनिलोद्धताः ॥२९८॥

ग्रन्थिर्ना पर्वपरुषी, गुन्द्रस्तेजनकः शरः ।
अणुपुष्पः शरे प्रोक्तस्तथा गुच्छालुरेव च ॥२९९॥

नडस्तु धमनः पोटगलो, ऽथ काशमस्त्रियाम् ।
इक्षुगन्धा पोटगलः, पुंसि भूम्नि तु बल्वजाः ॥३००॥

नटो नलो गले पोटः संज्ञालुर्दीर्घछिद्रवान् । नल ।
कुशः काशे समाख्यातः सर्वशास्त्रविशारदैः ॥३०१॥

रसाल इक्षुस्तद्भेदाः पुण्ड्रकान्तारकादयः ।
रसाले च समाख्याता मधुयष्टिर्महर्षिभिः ॥३०२॥

स्याद् वीरणं वीरतरं, मूलेऽस्योशीरमस्त्रियाम् ।
अभयं नलदं सेव्यममृणालं जलाशयम् ॥३०३॥

लामज्जकं लधुलयमवदाहेष्टकापथे ।
मृणालं शीतलं दाहहरणं शुभगन्धकम् ॥३०४॥ वेनार मूल ।

नलादयस्तृणं गर्मुत्, श्यामाकप्रमुखा अपि ।
अस्त्री कुशं कुशो[1] दर्भः, पवित्रमथ कत्तृणम् ॥३०५॥

पौरसौगन्धिकध्यामदेवजग्धकरोहिषम् ।
कर्ममूलं कुशो प्रोक्तं, देवजग्धेवनं मलम् ॥३०६॥
देवजग्धं वासकर्पूराह्वगन्धिद्रव्ये ।

छत्रातिछत्रपालघ्नो मालातृणकभूस्तृणे ।
शष्पं बालतृणं, घासो यवसं, तृणमर्जुनम् ॥३०७॥

---

1. कुथः (?)

गवादनञ्च घासे स्यात्तथा पाशवपालनम् ।
तृणानां संहृतिस्तृण्या नड्या तु नडसंहतिः ॥३०८॥

तृणराजाह्वयस्तालो दीर्घद्रुः करपत्रवान् ।
सदाफलो वरफलो नारिकेलस्तु लाङ्गली ॥३०९॥

घोण्टा तु पूगक्रमुकौ गुवाकः खपुरोऽस्य तु ।
फलमुद्वेगमेते च हिन्तालसहितास्त्रयः ॥३१०॥

खर्जूरः केतकी ताली खर्जूरी च तृणद्रुमाः ।
गुवाके कथितो विम्बुस्तथा लड्गलमेव च ॥३११॥

रामदूती पर्वपुष्पी विशल्या नागदन्तिका ।
काण्डनी सूक्ष्मपर्णी च भरण्याह्वा फणिज्झका ॥३१२॥
रामदूतिः ।

गुल्मी गृध्रनखी हिंस्रा काला च कुलिकोऽपरः ।
कार्पणः[1] कर्कटोऽहिंस्रा मणिका कदली क्षता ॥३१३॥ कुडकवालि ।

शीतला शीतली शीतकुम्भा पाण्डुरपुष्पिका । शीतली ।
क्षुद्रजीरं हृद्यगन्धं द्वितीयं कणजीरकम् ॥३१४॥ स्वल्पजीरा ।

महापत्रः शाकवृक्षो हलीनोऽर्णोऽर्जुनोपमः । शाकवृक्षे ।
घृतमण्डा वायसाली सुभद्रा मधुली घृता ॥३१५॥
। घृतमण्डा ।

विषापहा सुनन्दा स्यादर्कमूला पितद्विषा । ईसूलमूल ।
आनन्दी मुषिकाराबूःर्वामनो दृतिधारकः ॥३१६॥
। आकनपाता ।

1. कापालः –B

विषदंष्ट्रा सहा सर्पा कङ्काली विषनाशिनी । सर्पकङ्काली ।
भुजङ्गघातिनी सूरिः सर्पाक्षी क्षुत्करी स्पृशा ॥३१७॥
कङ्कालिका ।

दन्तपुष्पं दन्तफलं दारणं कतकं कुपम् । कतक ।
दर्भः पुरश्छदः शस्तः सोमपत्रः परात्प्रियः ॥३१८॥ उलु ।

मुञ्जकस्तेजनो बाण इक्षुकाण्डरसायकौ । मुजा ।
चेशदालो विधात्रायुः दिव्यवस्त्रो दिवाकरः ॥३१९॥ सूर्यशोभा ।

विशल्यकृद् रूपनाश आस्फोत आचरत्प्रियः । हाफरमाली ।
दुग्धपुच्छी सेवकालुः निशाभङ्गा नसंकरी ॥३२०॥ दुग्धपेया ।

स्पर्शलज्जा महाभीता वशिनी च महौषधिः । लाजालुवृक्षे ।
अखेडः खरपादाढ्यः कपित्यागी कपिप्रियः ॥३२१॥
वासकानी ।

त्रिकण्टः पत्रगुप्तश्च पेशलः सस्सं प्रतम् । तेकाँटा सिज ।
महाकण्टकिनी शून्या बिदरं विश्वसारकम् ॥३२२॥
फणीमनसा ।

मानसी दुर्गपुष्पी च वालाक्षी केशधारिणी । केशपुच्छा ।
कुक्कुरो वातरक्तघ्नो बालुकः शिखलोहितः ॥३२३॥
कुकुरमुडा ।

लङ्कास्थायी राजवृक्षो भद्रचूडो विषाकरः । लंकासिज ।
खड्गकोषः खड्गपत्रः खड्गिमारोऽच्छपुच्छकः ॥३२४॥
खञ्जालता ।

मरुन्माला वेल्लिकाख्या विल्वपत्री ज्वरापहा । बेलछुटा ।[1]
वा पुंसि पद्मं मलिनमरविन्दं महोत्पलम् ॥३२५॥

---

1. बेलशुंठा-B

सहस्रपत्रं कमलं शतपत्रं कुशेशयम् ।
पङ्केरुहं तामरसं सारसं सरसीरुहम् ।।३२६।।

बिसप्रसूनराजीवपुष्कराम्भोरुहाणि च ।
अप्सुजं शोभनं वार्जं रविनाथं रमाप्रियम् ।।३२७।।

आस्यपत्रं दृशाकाङ्क्ष्यं देवनं वनशोभनम् । पद्मम् ।
बिसिनी पद्मिनी पद्मी नलिनी च सरोजिनी ।।३२८।।
पद्मसमूहे ।

महापद्मं सिताम्भोजं पुण्डरीकं दृशोपमम् । श्वेतपद्मम् ।
इन्दीवरं नीलपद्मं नीलपत्रं मृदूत्पलम् ।।३२९।। नीलपद्मे ।

रक्तोत्पलं कोकनदं रक्तं रक्तसरोरुहम् । रक्तपद्मे ।
सौगन्धिकन्तु कल्हारं सुगन्धिकमथापि च ।।३३०।। सुंधि ।

रक्तसन्ध्यं हल्लकञ्च वह्निवर्णमलिप्रियम् । रक्त सुंधि ।
स्यादुत्पलं कुवलयं कुवेलं[1] कुवलं कुवम् ।।३३१।।

कैरवं कैवरं कुच्छं गर्दभं कुमुदं कुमुत् । कैरवे ।
कुमुद्वती कुमुदिनी तथा कैरविणी स्मृता ।।३३२।। कुमुदसमूहे ।

कुम्भिका वारिपर्णी च हठालुर्जलपृष्ठजे ।
शैवालं शैवलं शैवं जलनीली सकण्टकः ।।३३३।। सेडला ।

क्षीरशुक्लः शुक्लदुग्धः शृङ्गारो जलकण्टकः । पानिफल ।
शालूकं गोपभद्रञ्च पद्मादीनाञ्च कन्दके ।।३३४।।

पद्मादीनाञ्च दण्डे स्यान्नालं कोमलकं बिसम् ।
मृणालं विस, मञ्जादिकदम्बे षण्डमस्त्रियाम् ।।३३५।।

---

1. कवेलं

करहाटः शिफाकन्दः, किञ्जल्कः केशरोऽस्त्रियाम् ।
करहाटेऽब्जभोगः स्यात्, किञ्जल्कं किसरं विदुः ॥३३६॥

सम्वर्तिका नवदलं बीजकोषो वराटकः ।
सम्वर्तिकायां सत्पत्रं, बीजकोषे च पुष्फुषः ॥३३७॥

वृक्षो महीरुहः शाखी विटपी पादपस्तरुः ।
अनोकहः कुटः शालः पलाशी दु[1]द्रुमागमाः ॥३३८॥

अमन्दो भूपदो मूली परपाता प्रकाण्डरः । वृक्ष ।
वानस्पत्यः फलैः पुष्पात् तैरपुष्पाद् वनस्पतिः ॥३३९॥

वनस्पतिर्द्रुमात्रे स्यात् पर्णखण्डो वनस्पतौ ।
ओषधिः फलपाकान्ता, स्यादवन्ध्यः फले ग्रहिः ॥३४०॥

वन्ध्योऽफलोऽवकेशी च फलवान् फलिनः फली ।
प्रफुल्लोत्फुल्लसस्फुल्लव्याकोषविकचस्फुटाः ॥३४१॥

फुल्लश्चैते विकसिते, स्युरवन्ध्यादयस्त्रिषु ।
अफले रण्डकः प्रोक्तः, फुल्ले च प्रतिफुल्लकः ॥३४२॥

स्थाणु वा ना ध्रुवः शङ्कुः, ह्रस्वशाखाशिफः क्षुपः ।
स्थाणौ तु कथितो मुण्डः, क्षुपे चात्तडकोऽपि च ॥३४३॥

अप्रकाण्डे स्तम्बगुल्मौ, वल्ली तु व्रततिर्लता ।
गुल्मे च कथितो झुण्टः, संघट्टो व्रततौ मता ॥३४४॥

लता प्रतानिनी वीरुद् गुल्मिन्युलप इत्यपि ।
खेदिनी कथिता वैद्यैरुलुपे लोकदर्शनात् ॥३४५॥

नगाद्यारोह उच्छ्रायः उत्सेधश्चोच्छ्रयश्च सः ।
अस्त्री प्रकाण्डः स्कन्धः स्यान् मूलाच्छाखावधिस्तरोः ॥३४६॥

1· 'द्रु' इत्यमरः

उच्छ्राये उन्नतिः प्रोक्ता, प्रकाण्डे काण्ड उच्यते ।
समे शाखालत, स्कन्धशाखाशाले, शिफाजटे ॥३४७॥

शाखायां पल्लवाधारः, काला स्कन्धशिफा धरा । शिखा शिफा ।
शिरोऽग्रं शिखरं वाना, मूलं बुध्नोऽङ्घ्रिनामकः ॥३४८॥

शिखरे मस्तकाख्यः स्यात्, मूले तु तरुजीवनम् ।
सारो मज्जा समौ, त्वक् स्त्री वल्कं वल्कलमस्त्रियाम् ॥३४९॥

काष्ठं दार्विन्धनं त्वेध, इध्ममेधः समित् स्त्रियाम् ।
वल्कले वल्कुतं प्रोक्तं, इन्धने पमनेन्धिते ॥३५०॥

निष्कुहः कोटरं वाना, वल्लरिर्मञ्जरिः स्त्रियौ ।
निष्कुहे वृक्षभवनं खगस्थानं द्विजालयः ॥३५१॥

पलाशं छदनं पर्णं दलं पत्रं छदश्छदः ।[1]
पल्लवोऽस्त्री किसलयं, विस्तारो विटपोऽस्त्रियाम् ॥३५२॥

पल्लवे पत्रिणी प्रोक्ता विस्तारे प्रतिबन्धकः ।
वृक्षादीनां फलं सस्यं, वृन्तं प्रसवबन्धनम् ॥३५३॥

आमे फले शलाटुः स्यात्, शुष्के वानमुभे त्रिषु ।
शलाटौ कषणः शुण्ठो, वाने विप्रदहोऽङ्गरः ॥३५४॥

क्षारको जालकं क्लीबे, कलिका कोरकः पुमान् ।
स्याद्गुच्छकस्तु स्तबकः, कुड्मलो मुकुलोऽस्त्रियाम् ॥३५५॥

कोरकं कलिकायाञ्च, स्तबके गोस्तनोऽपि च ।
स्त्रियः सुमनसः पुष्पं प्रसूनं कुसुमं समम् ॥३५६॥

मकरन्दः पुष्परसः, परागः सुमनोरजः ।
द्विहीनं कुसुमे फल्यं, मकरन्दे सुधा मधु ॥३५७॥

1. 'छदः पुमान्' इत्यमरः ।

द्विहीनं प्रसवे सर्वं, हरीतक्यादयः स्त्रियाम् ।
आश्वत्थवैणवप्लाक्षनैयग्रोधैङ्गुदं फले ॥३५८॥

बार्हतञ्च, फले जम्ब्वा जम्बूःस्त्री जम्बु जाम्बवम् ।
पुष्पे जातीप्रभृतयः स्वलिङ्गाः, व्रीहयः फले ॥३५९॥

विदार्याद्यास्तु मूलेऽपि, पुष्पे क्लीबेऽपि पाटला ।
क्वचित्स्वलिङ्गा वासाद्या व्रीह्याद्याः शस्यकेऽपि च ॥३६०॥

॥ इति वृक्षादिवर्गः ॥

२. स्वर्णादिवर्गः

स्वर्णं सुवर्णं कनकं हिरण्यं हेम हाटकम् ।
तपनीयं शातकुम्भं गाङ्गेयं भस्म कर्बुरम् ॥१॥

चामीकरं जातरूपं महारजतकाञ्चनम् ।
रुक्मं कार्तस्वरं जाम्बूनदमष्टापदोऽस्त्रियाम् ॥२॥

दुर्वर्णं रजतं रूप्यं खर्जूरं श्वेतमित्यपि ।
रजते कथितं रुक्मं प्रजादानञ्च वेतनम् ॥३॥

रीतिः स्त्रियामारकूटो न स्त्रियाम्, अथ ताम्रकम् ।
शुल्वं म्लेच्छमुखं द्व्यष्टवरिष्ठोदुम्बराणि च ॥४॥

आरकूटे पित्तलं स्यात्, ताम्रकं रविसंज्ञकम् ।
नागसीसकयोर्वेष्ट[1]वप्राणि, त्रपु पिच्चटम् ॥५॥

मृद्वङ्गं पिच्चटं रङ्गं वङ्गं कस्तीर[2]मुत्फणम् ।
कांस्यके तु द्विरूप्यं स्यात्, खर्परे दन्तखेडकम् ॥६॥

1. योगेष्ट (?)
2. कुम्भीर-B

लोहोऽस्त्री शस्त्रकं तीक्ष्णं पिण्डं कालायसायसी ।
अश्मसारोऽथ, मण्डूरं शिङ्घाणमपि तन्मले ॥७॥

अश्मसारे दृढं पिण्डं, मण्डूरे शूलघातनम् ।
चपलः खलमूर्तिश्च रसः सूतश्च पारदः ॥८॥ पारा ।

पिञ्जरं पीतनं तालमालञ्च हरितालके ।
वक्रं रक्तं रसस्थानं हिङ्गुलं कपिशीर्षकम् ॥९॥

अलं पीतं पीतले च, हिङ्गुले हिङ्गुलं त्रयम् ।
अद्रिजं मेघनालञ्च गिरिजामलमभ्रकम् ॥१०॥ अभ्र ।

गन्धको गन्धिपाषाणो धातुवैरी सुगन्धकः ।
गैरेयमर्थ्यं[1] गिरिजमश्मजञ्च शिलाजतु ॥११॥

गैरिकं पाण्डुरं रामा पत्रा[2]वलिरुदाहृता । गेरि ।
पाकशुक्ला शिलाधातुः कठिनी कक्खटी खडी ॥१२॥ खडी ।

तुत्थकं तूतकं नीलं मृषातुत्थं मृतामदम् । तुत्थ ।
क्वाथोद्भवन्तु यत्तुत्थं कर्परी दार्विका च सा ॥१३॥

स्रोतोऽञ्जनन्तु सौवीरं कापोताञ्जनयामुनम् ।
शोभाञ्जनं पीतसारि नदीजञ्चाजलम्बलम्[3] ॥१४॥
स्रोतोऽञ्जन ।

कतकं तार्क्ष्यशैलञ्च रसगर्भं रसाञ्जनम् । रसाञ्जन ।
क्वाथोद्भवे तु कतके कामदर्पं कुशाञ्जनम् ॥१५॥

1. मश्यं (?)
2. वामाबत्रा-B
3. न्चाजलम्बनम्-(?)

सौवीरं सारमध्यञ्च पार्वतेयं सुवीरकम् । सौवीराञ्जन ।
रीतिपुष्पं पुष्पकेतु पौष्पकं कुसुमाञ्जनम् ॥१६॥

सदञ्जनञ्च चाक्षुष्यं, माक्षिके धातुमाक्षिकम् । धातुमाक्षि ।
मनःशिला तु कुनटी महोह्वा नागजिह्विका ॥१७॥

नैपाली कुनटी गोला कुनट्यान्तु शिवाऽपि च । मनछाल ।
स्यात् कुसुम्भं वह्निशिखं महारजनमित्यपि ॥१८॥

बोलगन्धरस प्राणपिण्डगोसशशाः[1] समाः ।
कुसुम्भे कुक्कुटशिखं, बोले तु रसगन्धकः ॥१९॥

हिण्डीरोऽब्धिकफः फेनः, सिन्दूरं नागसम्भवम् ।
हिण्डीरे तु महाफेनो, सिन्दूरे भालदर्शनम् ॥२०॥

गोलोमी स्वल्पकेशी च भूतकेशश्च केशधृत् । भूतकेश ।
पत्राङ्गं पत्रवद्गन्धं सुशाखं रक्तचन्दनम् ॥२१॥
रक्तचन्दनाकारे द्रव्ये पत्तुङ्गा (इति) ख्याते ।

कापोतष्टङ्कणं टङ्कः, सर्जिका धातुमारिणी । सोहागा ।
वंशक्षीरा तुगाक्षीरी त्वक्क्षीरा वंशलोचना ॥२२॥

माक्षिकं पौष्पिकं क्षौद्रं मधु पुष्परसोऽलिपम् । मधु ।
मधूच्छिष्टे सिक्थकः स्यात् मधुकोषो मधुक्रमः ॥२३॥[2]

अक्षीरं[3] वशिरं क्षेमु समुद्रासन्नसम्भवम् ।
समुद्रासन्नसम्भवे लवणे ।
सैन्धवे माणिमन्थश्च शीतशिवमुदाहृतम् ॥२४॥ सैन्धवलवण ।

---

1. 'गोपरसाः' इत्यमरः ।
2. आद्यद्वयं मोम्, शेषद्वयं मडचाक ।
3. अक्षीवं (?)

रोमकं रोमलवणं वसुकर सुरत्नकम् । साम्भरिलवणे ।
पाक्यं विडं विड्लवणं विडङ्गं विटकं विशम् ॥२५॥
विटलवण ।

अक्षं सौवर्चलं कृष्णलवणं रुचकं चरुः । सेचल ।
त्रिकटु कटुकं तिक्तं समुद्रोद्भवमीरितम् ॥२६॥ करकच ।

पाचकं लवणं पाक्यं पांशुकं सर्वगं कटुः । सामान्य लवण ।
कापोतः सर्जिकाक्षारो रुचकं शुक[1] वर्चकः ॥२७॥

सौवर्चलं सतीक्षारो यवक्षारो यवाग्रजः ।
पाक्यः सुतीक्ष्णः साजारः पटुकर्माऽपि कथ्यते[2] ॥२८॥

इति स्वर्णादिवर्गः ॥

३. घृतादिवर्गः

घृतमाज्यं हविः सर्पिः वह्निभोग्यं तनूनपम् । घृत ।
दुग्धं क्षीरं पयः पेयं नवनीतं नवोद्धृतम् ॥१॥

पयस्यमाज्यदध्यादि, द्रप्स्यं दधि घनेतरत् ।
तत्तु हैयङ्गवीनं यत् ह्योगोदोहोद्भवं घृतम् ॥२॥

हैयङ्गवीने सम्प्रोक्तं जीवनं छात्रदर्शनम् ।
नवनीते नवं शुक्लं सारजं सरजं हिमम् ॥३॥

दध्युत्तरं सरः सारः दधिस्नेहश्च कट्वरम् । दधिसर ।
क्षीरं सद्यः प्रसूतायाः पेयूषः पालनं विकम् ॥४॥

मण्डं दधिभवं मस्तु मथितञ्च प्रदृश्यते ।
दध्ना सह पयः पक्वं यत् स्यात्तद्दधिकूर्च्चिका ॥५॥

---

1. 'सुखवर्चकः' इत्यमरः
2. पूर्वोक्ताः षट् सांचीक्षार, शेषोक्ताः षट् यवक्षार ।

तक्रेण सह यत् क्षीरं पक्वं तत्तक्रकूर्चिका ।
दण्डाहतं कालशेयमरिष्टमपि गोरसः ॥६॥

घोलं घनञ्च मलिनं केवलं भग्नसन्धिकम् । घोल ।
तक्रं ह्युदश्विन्मथितं पादाम्ब्वर्धाम्बु निर्जलम् ॥७॥

ससारं यद्भवेत्तक्रं कट्वरं तत् प्रकीर्त्तितम् ।
मण्डं रसाग्रे गव्यन्तु गवां सर्वं विशादिकम् ॥८॥

छलनं गोमयं गोविट् गोकृतं पावनं परम् । गोमय ।
तद् विशुष्कं करीषोऽस्त्री वनस्थञ्चेत्तु घुण्टिकम् ॥९॥

सितोपला सिता शुक्ला शर्करा बालुकातिमका । चिनी ।
गुडजः खण्डकः साध्यः फाणितं किन्तु मध्यकम् ॥१०॥

लासिका रासिका लासा मत्स्याण्डी दृढगात्रिका ।[1]
धान्यं व्रीहिः स्तम्बकरिः स्तम्बो गुच्छस्तृणादिनः ॥११॥

उच्यते तत् त्रिधा शालिषष्टिकव्रीहिभेदतः ।
शालयो हैमनाः प्रोक्ताः षष्टिका ग्रीष्मजा अपि ॥१२॥

व्रीहयश्चाशवः ख्याताः प्रावृट्कालसमुद्भवाः ।
आशुधान्ये पाटलः स्यात् षष्टिके सर्वसङ्गतः ॥१३॥

श्यामाक ओडिका कङ्गुर्हस्तिश्यामाकचीनकः ।
कोद्रवो वीरकश्चैव तद्भेदो यवगोधुमौ ॥१४॥

श्यामाकः शामलो वस्तु, रोडिका कङ्गुकोढिकौ ।
हस्तिश्यामा च पिण्डा[2] च कठिल्लककरद्विषौ ॥१५॥

कोद्रवः कोरदूषः स्याद् रोरको[3] बन्धुपालकः ।
सितशूको यवः प्रोक्तो, गोधूमो गोधुमश्च सः ॥१६॥

---

1. लसिकादित्रयं काटुका मत्स्याण्डीति मिछिरी ।
2. पिचिण्डा-A
3. वोरको (?)

कुल्माषो यावको याऽरणुस्तु छिन्न उच्यते ।
यवेऽपक्वे तु तोक्मः स्याद्, गोधूमे गन्धविह्वलः ॥१७॥

कलायो मावलः कीलो हरेणुश्च सतीनकः ।
खण्डिकः कुक्षिशूलश्च यन्त्रगोलश्च गोलकः ॥१८॥ मटर ।

सतीना निण्डिका तिण्टी, आढकी तुवरी तथा ।[1]
मुद्गो महाण्ट इत्युक्तो माषस्तु भेदनोऽमितः ॥१९॥

चणको भिन्नभिन्नात्मा वातलो हरिमन्थजः । छोला ।
मङ्गल्यो लोहितश्चक्रो मसूरो वनसङ्कटः ॥२०॥ मसूरि ।

वनमुद्गो वल्गुपुत्रो मुद्गष्टकमयष्टकौ ।
कुलत्थः कुन्तली कुल्या कुन्तकारी कुलत्थिका ॥२१॥
कुलत्थकलाई ।

राजमाषो महामाषो द्विजशप्तो मरुत्करः । राजमाष कलाई ।
तिलः सुवन्धः सारालः कथितो माछलोऽतुलः ॥२२॥ तिल ।

सर्षपस्तुन्तुभो ज्येष्ठबिम्वटश्च कदम्बकः । सरिषा ।
सिद्धार्थो धवलो ज्येष्ठस्तत्र मङ्गल्य उच्यते ॥२३॥

क्षवः क्षुधाभिजननो राजिका कृष्णिकासुरी ।
राजिला कथिता वैद्यैः कृष्णिकायां प्रयोगतः ॥२४॥

मसीना चातसीचिह्ना क्षुमोमा मालिका मिता । मसीना ।
मातुली मातुलानी च भङ्गा भग्ना गजाशना ॥२५॥ भङ्गा ।

शमी शिम्बा धान्यकोषे, स्त्रीगवेधुर्गवेधुका ।
गवेधुकायां वज्राङ्गी हिंस्रा स्वाश्रयनाशिनी ॥२६॥ गडगड्या ।

इति घृतादिवर्गः ॥३॥

---

1. सतीनादित्रयं तेडडा, आढक्यादिद्वयं अरड ।

४. भूम्यादिवर्गः

भूर्भूमिरचलानन्ता रसा विश्वम्भरा स्थिरा ।
धरा धरित्री धरणी क्षोणी ज्या काश्यपिः क्षितिः ॥१॥

सर्वंसहा वसुमती वसुधोर्वी वसुन्धरा ।
गोत्रा कुः पृथिवी पृथ्वी क्ष्मावनिर्मेदिनी मही ॥२॥

विश्वगन्धा जगद्योनिर्मधुजा गौ रणेसहा । पृथिवी ।
मृन्मृत्तिका प्रशस्ता तु, मृत्सा मृत्स्ना तु मृत्तिका ॥३॥

मृत्तिकायां मृदा प्रोक्ता मृत्सायां मृदिनी मता ।
उर्वरा सर्वसस्याढ्या, स्यादूषः क्षारमृत्तिका ॥४॥

आपः स्त्री भूम्नि वार्वारि सलिलं कमलं जलम् ।
पयः कीलालममृतं जीवनं भुवनं वनम् ॥५॥

कबन्धमुदकं पाथः पुष्करं सर्वतोमुखम् ।
अम्भोऽर्णस्तोयपानीयनीरक्षीराम्बुशम्बरम् ॥६॥

मेघपुष्पं घनरसस्त्रिषु द्वे आप्यमम्मयम् ।
जले रोमञ्च मृदुलं तृषाहं वह्निमारकम् ॥७॥

शीतोत्तमं शरणकं नलिनं सलिलाशयः ।
सर्पः पृदाकुर्भुजगो भुजङ्गोऽहिर्भुजङ्गमः ॥८॥

आशीविषो विषधरश्चक्री व्याडः सरीसृपः ।
कुण्डली गूढपाच्चक्षुःश्रवाः काकोदरः फणी ॥९॥

दर्वीकरो दीर्घपृष्ठो दन्दशूको बिलेशयः ।
उरगः पन्नगो भोगी जिह्मगः पवनाशनः ॥१०॥

कञ्चुकालुः कद्रुपुत्रो विषारो विषदन्तकः ।
स्थूलास्यो दीर्घरसनो लाङ्गली कर्णवर्जितः ॥११॥ सर्प ।

अमृतं जीवनाघातं क्ष्वेडश्च गरलं विषम् ।
गरं धूलकमित्थं स्यात् विषलं चञ्चलं निदम् ॥१२॥ विष ।

पुंसि क्लीबे च काकोलकालकूटहलाहला: ।
सारोष्ट्रिकः शौक्लिकेयो ब्रह्मपुत्रः प्रदीपनः ॥१३॥

दारदो वत्सनाभश्च विषभेदा अमी नव ।
हलाहले हालहलं हहलञ्च प्रकीर्त्तितम् ॥१४॥

सारोष्ट्रिके च कथितौ सौराष्ट्रिकसुराष्ट्रजौ ।
प्रदीपने नमस्कारो, दारदे छन्द इत्यपि ॥१५॥

वत्सनाभे च कालिन्दः शाम्भवो बालभद्रकः ।
पृथुरोमा झषो मत्स्यो मीनो वैसारिणोऽण्डजः ॥१६॥

विषारः शकली चाथ गडकः शकुलार्भकः ।
जलजो जलबन्धुश्च जलचारी जलप्रियः ॥१७॥

अध्वलो जवनोऽण्डालुर्विषारे परिकीर्त्तितः ।
सहस्रदंष्ट्रः पाठीनः उलूपी शिशुकः समौ ॥१८॥

उलपी शिशुके प्रोक्तः पाठीने तत उण्डकः ।
पाठीन बोयाल उलूपी उलोप ।
नलमीनश्चिलचिमः, प्रौष्ठी तु शफरी द्वयोः ॥१९॥

चिलीचिमस्तु कवलो नलमीने विलोटकः ।
बालिषा गडाई प्रोष्ठी पूंठी ।
रोहितो भाकुटो बालः शकुलो मद्गुरस्तिमिः ॥२०॥

शालः शिलिन्दो राजीवः कुडिशो बहुमारकः ।
इल्लिशो वार्युषो मद्गुर्नन्द्यावर्तस्तिमिङ्गिलः ॥२१॥

श्टृङ्गी त्रिकण्टो वार्मुषो वर्मिमत्स्यस्तपः करः ।
तपस्वी चेष्टकश्चेष्टश्चिङ्गटः कवची फलिः ॥२२॥

चलदङ्गः पार्वतेयः पार्वतः शकुली रडः ।
धरो वल्लिगडो वाच एडङ्गश्चन्द्रकोमलः ॥२३॥

चम्पकन्दो गाङ्गकेयः पङ्कासो[1] दण्डिकष्ठुलः ।
खलिशो मधुरोनश्च गवाची गलधारिणी ॥२४॥

मथुरो गादुलश्चैते मीनभेदाः प्रकीर्त्तिताः ।
क्षुद्राण्डमत्स्यसंघातः पोताधानं झसासृजम् ॥२५॥ पोना ।

हाङ्गरः शिशुमारोद्रशङ्करो[2] मकरादयः ।
एते च यादोभेदाः स्युः, यादांसि जलजन्तवः ॥२६॥

स्यात् कुलीरः कर्कटकः, कूर्मे कमठकच्छपौ ।
कुलीरेऽपत्यशत्रुः स्यात्, कमठे कच्छपोऽपि च ॥२७॥

ग्राहोऽवहारे, नक्रस्तु कुम्भीरो, ऽथ महीलता ।
गण्डूपदः किञ्चुलुको, निहाका गोधिका समे ॥२८॥

गण्डूपदे दीप्तरसो, ह्यवहारे तु वाग्घरः ।
शुष्काङ्गी च निहाकायां बृहत्पादी च कीर्त्तिता ॥२९॥

रक्तपा तु जलौकायां स्त्रियां भूम्नि जलौकसः ।
द्विमुखी कडया प्रोक्ता जलौकायां महर्षिभिः ॥३०॥

मुक्तास्फोटः स्त्रियां शुक्तिः शंखः स्यात् कम्बुरस्त्रियौ ।
मुक्तागारश्च शुक्तौ स्यात्, सिन्धुपुष्पश्च शङ्खके ॥३१॥
शुक्तिपिझनुक ।

---

1. पङ्काशो-B
2. शङ्कराः (?)

क्षुद्रशङ्खाः शंखनखाः[1], शम्बूकाः जलशुक्तयः ।
क्षुद्रशङ्खो नखालिः स्यात्, शम्बूकायाञ्च शम्बुकः ॥३२॥

भेके मण्डूकवर्षाभूशालूरप्लवदर्दुराः ।
शिली गण्डूपदी भेकी वर्षाम्वी कमठी दुली ॥३३॥

भेके प्लवगतिः प्रोक्तः, कमठ्यां कच्छपी तथा ।
अभ्रं मेघो वारिवाहः स्तनयित्नुर्बलाहकः ॥३४॥

धाराधरो जलधरस्तु तडित्वान् वारिदोऽम्बुभृत् ।
धनजीमूतमुदिरजलमुग्धूमयोनयः ॥३५॥

विचित्रदेहो जलभूः खचरः पर्वताशयः ।
पर्णाशनः काममूर्त्तिः शक्रवाहन इत्यपि ॥३६॥ मेघ ।

वर्षोपलस्तु करका वार्षिणा जलमूर्त्तिका । शिल ।
अग्निर्वैश्वानरो वह्निर्वीतिहोत्रो धनञ्जयः ॥३७॥

कृपीटयोनिर्ज्वलनो जातवेदास्तनूनपात् ।
बर्हिः शुष्मा कृष्णवर्त्मा शोचिष्केश उषर्बुधः ॥३८॥

आश्रपाशो बृहद्भानुः कृशानुः पावको ऽनलः ।
रोहिताश्वो वायुसखा शिखावानाशुशुक्षणिः ॥३९॥

हिरण्यगर्भो हुतभुग् दहनो हव्यवाहनः ।
सप्तार्चिर्दमुनाः शुक्रश्चित्रभानुर्विभावसुः ॥४०॥

शुचिरप्पित्तमौर्वस्तु वाडवो बडवानलः ।
देववज्रं महातेजाः पचनः फूत्करोऽनले ॥४१॥ अग्नि ।

---

1. शङ्खनका: (?)

श्वसनः स्पर्शनो वायुर्मातरिश्वा सदागतिः ।
पृषदश्वो गन्धवहो गन्धवाहानिलाशुगाः ॥४२॥

समीरमारुतमरुज्जगत्प्राणसमीरणाः ।
नभस्वद्वातपवनपवमानप्रभञ्जनाः ॥४३॥

देहधृग्जगदाधारश्चालकश्चञ्चलस्तु गः ।
सर्वत्रगामी सञ्चारी वह्निमित्रः खगः परः ॥४४॥ वायुः ।

द्योदिवौ द्वे स्त्रियावभ्रं व्योम पुष्करमम्बरम् ।
नभोऽन्तरीक्षं गगनमनन्तं सुरवर्त्म खम् ॥४५॥

वियद् विष्णुपदं वा तु पुंस्याकाशविहायसी ।
अनिरुध्दपथं शून्यं वायुवर्त्माम्ब्वनञ्जनम् ॥४६॥ आकाश ।

कालो दिष्टोऽप्यनेहापि समयोऽखण्डलोऽमरः । समय ।
घस्रो दिनाह्नी वा तु क्लीबे दिवसवासरौ ॥४७॥

सूर्यकालः समुदयः पर्यायाः परिकीर्त्तिताः ।
निशा निशीथिनी रात्रिस्त्रियामा क्षणदा क्षपा ॥४८॥

विभावरीतमस्विन्यौ रजनी यामिनी तमी ।
चन्द्रकान्ता सुरजनी शर्वरी च निरातपा ॥४९॥ रात्रि ।

सूरसूर्यार्यमादित्यद्वादशात्मदिवाकराः ।
भास्कराहस्करब्रध्नप्रभाकरविभाकराः ॥५०॥

भास्वद्विवस्वद्सप्ताश्वहरिदश्वोष्णरश्मयः ।
विकर्तनार्कमार्तण्डमिहिरारुणपूषणः ॥५१॥

द्युमणिस्तरणिर्मित्रश्चित्रभानुर्विरोचनः ।
बिभावसुर्ग्रहपतिस्त्विषांपतिरहःपतिः ॥५२॥

भानुर्हंसः सहस्रांशुस्तपनः सविता रविः ।
त्रिलोकेशः प्रकाशात्मा गभस्तिहस्ततापनौ ।।५३।।

कोकबन्धुः पद्मबन्धुः पिङ्गलः कपिलद्युतिः । सूर्यं ।
हिमांशुश्चन्द्रमाश्चन्द्र इन्दुः कुमुदबान्धवः ।।५४।।

विधुः सुधांशुः शुभ्रांशुरोषधीशो निशापतिः ।
अब्जो जैवातृकः सोमो ग्लौर्मृगाङ्कः कलानिधिः ।।५५।।

द्विजराजः शशधरो नक्षत्रेशः क्षपाकरः ।
कलापूर्णः सिन्धुजन्मा चित्रेशो रात्रिदीपकः ।।५६।।

अशतुर्बुधतातश्च भग्नात्मा मस्करी हिमः । चन्द्र ।
चन्द्रिका कौमुदी ज्योत्स्ना प्रकाशोद्योत आतपः ।
अकल्का चन्द्रिकायाञ्च प्रकाशे शातपत्रकः ।।५७।।

इति भूम्यादिवर्गः ।।४।।

५. मनुष्यवर्गः

मनुष्याः मानुषाः मर्त्याः मनुजाः मानवा नराः ।
स्युः पुमांसः पञ्चजनाः पुरुषाः पूरुषाः नरः ।।१।।

बुद्धिमानी धूर्त्तजन्तु र्निदद्रुर्मनुभूर्नरे । सामान्य मनुष्य ।
स्त्री योषिदबला योषा नारी सीमन्तिनी वधूः ।।२।।

प्रतीपदर्शिनी वामा वनिता महिला तथा ।
परिगृह्या च वामाङ्गी भगिनी प्रकृतिर्नरी ।।३।। स्त्री ।

अङ्गं प्रतीकोऽवयवोऽपघनोऽथ कलेवरम् ।
वपुः संहननं गात्रं शरीरं वर्ष्म विग्रहः ।।४।।

कायो देहः क्लीबपुंसोः स्त्रियां मूर्त्तिस्तनूस्तनुः ।
अङ्गे प्रतिघ्नं मूर्त्तौ तु रोगभूर्जीवमन्दिरम् ॥५॥ शरीर ।

आद्य धातू रसो रस्यो धातुपो भोज्य सम्भवः ।
रुधिरेऽसृग्लोहितास्त्ररक्तक्षतजशोणितम् ॥६॥

द्वितीयं रसजं रस्यं रोहितं बलमित्यपि ।
पिशितं लरलं मांसं पललं क्रव्यमामिषम् ॥७॥

तृतीयं रक्तजं शुक्तं कर्दमञ्च प्रकीर्त्तितम् ।
वपा वसा च मेदश्च रोगनं मांसजातिकम् ॥८॥

शलाका कीकसं कुल्यं मेदोजं हड्डमस्थि च ।
मज्जा तु मज्जनं षष्ठं हड्डुजं शुक्रभूश्च तत् ॥९॥

शुक्रं तेजोरेतसी च बीजवीर्येन्द्रियाणि च ।
रेतनं वपनं पुंस्त्वं प्राधान्यं धातुराजकम् ॥१०॥
रसादयः सप्तधातवः ।

धमनी धामिनी नाडी सिरा हिंस्रा रसालसा । नाडी ।
पश्चाद्ग्रीवा सिरा मन्या घाटिका सा प्रकीर्त्तिता ॥११॥

तिलकं क्लोम, मस्तिष्कं गोर्दं, किट्टं मलोऽस्त्रियाम् ।
तृषाभूस्तिलके ख्याता, गोर्देऽपिक्ष्वं, मले मलूः ॥१२॥

अन्त्रं पुरीतत्, गुल्मस्तु प्लीहा पुंस्यथ वस्नसा ।
स्नायुः स्त्रियां, कालखण्डयकृती तु समे इमे ॥१३॥

अन्त्रे स्वप्नेऽस्त्रभूर्गुल्मे वसुस्नायाञ्च वस्नुसा ।
स्थानान्यामाग्निपक्वानां मूत्रस्य रुधिरस्य च ।
हृद्दण्टुकः[1] फुफ्फुसश्च कोष्ठ इत्यभिधीयते ॥१४॥

श्लेष्मा कफो बलासश्च, मायुः पित्तञ्च कान्तिदम् ।
एषाञ्च बहुविस्तारो दृश्यो देहनिरीक्षणे ॥१५॥

1. हृदुण्डुकः (?)

सृणिका स्यन्दिनी लाला, दूषिका नेत्रयोर्मलम् ।
लालायां पिच्छिला ख्याता, रसिका लसिका तथा ॥१६॥[1]

क्षतजं मलजं पूयं पूयनं प्रसितञ्च तत् । पूय ।
मूत्रं प्रस्राव, उच्चारावस्करौ शमलं शकृत् ॥१७॥

गूथं पुरीषं वर्चस्कमस्त्री विष्ठाविषौ स्त्रियौ ।
प्रस्रावे मेहनं मेहो, वर्चस्के शोधनं सुगम् ॥१८॥

स्यात् कर्परः कपालोऽस्त्री शरावः खल्लिकापि च ।
स्याच्छरीरास्थिन कङ्कालः पृष्ठास्थिन तु कशेरुका ॥१९॥

शिरोऽस्थनि करोटिः स्त्री, पार्श्वास्थनि तु पर्शुका ।
कङ्काले कथितः संयः, करोटौ कपिकन्दुकः ॥२०॥

पादाग्रं प्रपदं पादः पदङ्घ्रिश्चरणोऽस्त्रियाम् ।
अधमाङ्गं पदं पादे, प्रपदे पदिकं तमम् ॥२१॥

तद्ग्रन्थी घुटिके गुल्फौ, पुमान् पार्ष्णिरधस्तयोः ।
जङ्घा तु प्रसृता, जानूरुपर्वाष्ठीवदस्त्रियाम् ॥२२॥

प्रसृतायां भवेत्प्रेष्ठा, चोरुपर्वणि पर्वकम् ।
सक्थि क्लीबे पुमानूरुः तत्सन्धिः पुंसि वंक्षणः ॥२३॥

सक्थ्यूरुपर्वसन्धिर्यस्तत्र स्यान् मालचक्रकम् ।
गुदं त्वपानं पायुर्ना, बस्तिर्नाभेरधो द्वयोः ॥२४॥

कटौ ना श्रोणिफलकं, कटिः श्रोणी ककुद्मती ।
पश्चान्नितम्बः स्त्रीकट्याः, क्लीबे तु जघनं पुरः ॥२५॥

कूपकौ तु नितम्बस्थौ, द्वयहीने कुकुन्दरे ।
स्त्रियां स्फिचौ कटिप्रोथौ, उपस्थो वक्ष्यमाणयोः ॥२६॥

---

1. रसिकादित्रयं लसिकायाः । लसिका देहस्थजलस्य पिच्छाभागः रसालीति लोके ।

नितम्बे घटिकं प्रोक्तं, चोपस्थे राजचिह्नकम् ।
भगं योनिर्द्वयोः, शिश्नो मेढ्रो मेहनशेफसी ॥२७॥

ललाको मेहने प्रोक्तो, भगे स्यान्मदनायुधः ।
मुष्कोऽण्डकोषो वृषणः पृष्ठवंशाधरे त्रिकम् ॥२८॥

वृषणे रमणः प्रोक्तः पृष्णन्तु विग्रहावरम् ।
पिचिण्डकुक्षिजठरोदरं तुन्दं, स्तनौ कुचौ ॥२९॥

नाभिस्तनान्तरं जन्तोरामाशय इति स्मृतः ।
चूचुकं तु कुचाग्रं स्यात्, ना क्रोडं भुजान्तरम् ॥३०॥

उरो वत्सञ्च वक्षश्च वंक्षणं[1] गलपीठकम्[2] ।
स्कन्धो भुजशिरोंऽसोऽस्त्री, सन्धी तस्यैब जत्रुणी ॥३१॥

स्कन्धे कत्सवरं प्रोक्तं, विज्ञेयं चिरु जत्रुणि ।
वाहुमूले उभौ कक्षौ, पार्श्वमस्त्री तयोरधः ॥३२॥

मध्यमञ्चावलग्नञ्च मध्योऽस्त्री, द्वौ परौ द्वयोः ।
भुजबाहू प्रवेष्टो दोः स्यात् कफोणिस्तु कूर्परः ॥३३॥

मध्यमे बलविन्यासो , भुजे करणमित्यपि ।
बाहूपरि प्रगण्डः स्यात्, प्रवेष्टो[3] नीचभागकः ॥३४॥

मणिबन्धादाकनिष्ठं करस्य करभो वहिः ।
पञ्चशाखः शयः पाणिः, तर्जनी स्यात् प्रदेशिनी ॥३५॥

अङ्गुल्यः करशाखाः स्युः पुंस्यङ्गुष्ठः प्रदेशिनी ।
मध्यमानामिका चापि कनिष्ठा चेति ताः क्रमात् ॥३६॥

---

1. वक्षणं VS
2. 'पृष्ठं तु चरमं तनोः' इत्यमरः ।
3. 'प्रकोष्ठः' इत्यमरः ।

पञ्चशाखे कङ्गुलः स्यात्, तर्जन्यां तरितापि च ।
पुनर्भवः कररुहो नखोऽस्त्री नखरोऽस्त्रियाम् ॥३७॥

नखरे चन्द्रकः प्रोक्तो निर्णखः खण्डकश्च सः ।
प्रादेशतालगोकर्णास्तर्जन्यादियुते तते ॥३८॥

अङ्गुष्ठे सकनिष्ठे स्याद् वितस्तिर्द्वादशाङ्गुलः ।
पाणौ चपेटः प्रतलः प्रहस्तो विस्तृताङ्गुलौ ॥३९॥

द्वौ संहतौ संहतल[1]प्रतलौ वामदक्षिणौ ।
ख्यातः संहतले सन्तश्चपेटे चोत्थिताङ्गुलिः ॥४०॥

पाणिर्निकुब्जः प्रसृत[2] स्तौ युतावञ्जलिः पुमान् ।
प्रकोष्ठो विस्तृतकरो हस्तो मुष्ट्या तु बद्धया ॥४१॥

सरत्निः स्यादरत्निस्तु निष्कनिष्ठेन मुष्टिना ।
प्रवेष्टो विस्तृतकरो गज इत्यभिधीयते ॥४२॥

व्यामो बाह्वोः सकरयोस्ततयोस्तिर्यगन्तरम् ।
ऊर्ध्वविस्तृतदोः पाणिनृमाने पौरुषं त्रिषु ॥४३॥

व्यामे च कथितोऽपोतो, मानञ्च पौरुषे मतम् ।[3]
कण्ठो गलोऽथ ग्रीवायां शिरोधिः कन्धरेत्यपि ॥४४॥

प्राणनश्च गले प्रोक्तः, शिरोधौ मस्तमूलकम् ।
वक्त्रास्ये वदनं तुण्डमाननं लपनं मुखम् ॥४५॥

क्लीबे घ्राणं गन्धवहा घोणा नासा च नासिका ।
वदने वन्दनं प्रोक्तं, घोणायां घ्रातिरुच्यते ॥४६॥

---

1. सिंहतलः (?)

2. 'प्रसृतिः' इत्यमरः ।

3. अङ्गुल्यग्रे तीर्थं देवं, स्वल्पाङ्गुल्योर्मुनिकायं, मध्येऽङ्गुष्ठाङ्गुल्योः पैत्रं, मूले ह्यङ्गुष्ठस्य ब्राह्मम् । ब्राह्मे वेधसमित्युक्तं पैत्रे च पितृतर्पणम् ।

ओष्ठाधरौ तु रदनच्छदौ दशनवाससी ।
अधः स्याच्चिबुकं, गण्डौ कपोलौ, तत्परा हनुः ।।४७।।

अधरे निष्कलः स्नायः, चिबुके तुण्डिरिण्डिलौ ।
रदना दशना दन्ता रदाः, तालु तु काकुदम् ।।४८।।

रसज्ञा रसना जिह्वा प्रान्तावोष्ठस्य सृक्कणी ।
रदनेषु दतो दंष्ट्रा, जिह्वायाञ्चपलाऽछला ।।४९।।

ललाटमलिकं गोधिः ऊर्ध्वे दृग्भ्यां भ्रुवौ स्त्रियौ ।
कूर्चमस्त्री भ्रुवोर्मध्यं, तारकाक्ष्णः कनीनिका ।।५०।।

ललाटे भालमित्युक्तं, कनीन्यां नयनी मता ।
लोचनं नयनं नेत्रमीक्षणं चक्षुरक्षिणी ।।५१।।

दृग् दृष्टिः, चाश्रु नेत्राम्बु रोदनञ्चास्रमश्रु च ।
अक्षं दृशा स्यान्नयने, रोदने प्रेमपातनम् ।।५२।।

अपाङ्गौ नेत्रयोरन्तौ, कटाक्षोऽपाङ्गदर्शने ।
कर्णशब्दग्रहौ श्रोत्रं श्रुतिः स्त्री श्रवणं श्रवः ।।५३।।

मलो कर्णस्य तुष्टुः स्यात्, कर्णपत्रे तु पालिका ।
उत्तमाङ्गं शिरः शीर्षं मूर्धा ना मस्तकोऽस्त्रियाम् ।।५४।।

चिकुरः कुन्तलो बालः कचः केशः शिरोरुहः ।
चूडालं मस्तके मस्तं, चिकुरे कृशनामृतौ ।।५५।।

तनूरुहं रोम लोम, तद्वृद्धं श्मश्रु पुंमुखे ।।५६।।

इति मनुष्यवर्गः ।।५।।

६. सिंहादिवर्गः

सिंहो मृगेन्द्रः पञ्चास्यो हर्यक्षः केशरी हरिः ।
जटिलः पशुराजश्च भीमनादो विसङ्कटः ॥१॥ सिंह ।

शार्दूलद्वीपिनौ व्याघ्रे, तरक्षुस्तु मृगादनः ।
शार्दूले स्याद्विचित्राङ्गो, तरक्षौ तु युयुक्षुरः[1] ॥२॥

वराहः शूकरो गृष्टिः कोलः पोत्री किरिः किटिः ।
दंष्ट्री घोणी स्तब्धरोमा क्रोडो भूदार इत्यपि ॥३॥

दृढरोमा वराहे स्याद्, विट्चरो ग्राम्यशूकरे ।
कपिप्लवङ्गप्लवगशाखामृगवलीमुखाः ॥४॥

मर्कटो वानरः कीशो वनौका अथ भल्लुके ।
ऋक्षाच्छभालभल्लूकाः, गण्डके खड्गखड्गिनौ ॥५॥

लाङ्गूली मर्कटे, भल्लुर्भल्लुके लोमशेहिकौ ।
ललायो महिषो वाहद्विषत् कासरसैरिभाः ॥६॥

गण्डाङ्गो गण्डके प्रोक्तो, लुलायो[2] महिषो मतः ।
दन्ती दन्तावलो हस्ती द्विरदोऽनेकपो द्विपः ॥७॥

मतङ्गजो गजो नागः कुञ्जरो वारणः करी ।
इभः स्तम्बेरमः पद्मी, यूथनाथस्तु यूथपः ॥८॥

गिरिमालः शूर्पकर्णो बृहदङ्गो मतङ्गजे ।
मदोत्कटो मदकलः, कलभः करिशावकः ॥९॥

यूथिनो यूथपे युक्ता, कलभे करभः शिशुः ।
प्रभिन्नो गर्जितो मत्तः, समावुद्भ्रान्तनिर्मदौ ॥१०॥

---

1. खुरः -A
2. लुलापो-B

गर्जिते मदविक्षिप्तो, निर्मदे गतसन्नकः ।
कुञ्जरा कुञ्जरी नागा करिणी धेनुका वशा ॥११॥

घोटके पीतितुरगतुरङ्गाश्वतुरङ्गमाः ।
वाजिवाहार्वगन्धर्वहयसैन्धवसप्तयः ॥१२॥

युद्धसारो राजवाहः प्रयुद्धेषी निगालवान् ।
आजानेयाः कुलीनाः स्युः, विनीताः साधुवाहिनः ॥१३॥

प्रभुभक्ताः भक्तिताश्च कुलीने तु कुलोत्कटाः ।
वनायुजाः पारसीका काम्बोजा बाह्लिकाः हयाः ॥१४॥

सैन्धवा मारुजा जीज्ञा वादुजा वैरिका[1]स्तथा ।
ययुरश्वोऽश्वमेधीयो, जवनस्तु जवाधिकः ॥१५॥

पृष्ठः स्थौरी सितः कर्को रथ्यो वोढा रथस्य यः ।
ययौ, दागोऽपि जवने वायवो जवनो मतः ॥१६॥

बालः किशोरो, वाम्यश्वा वाडवा घोटकी हया ।
उष्ट्रे क्रमेलकमथ महाङ्गाः, करभः शिशुः ॥१७॥

उष्ट्रे वणिग्वहो दीर्घग्रीवः स्याच्च कुबाहुलः ।
उक्षा भद्रो बलीवर्दः ऋषभो वृषभो वृषः ॥१८॥

अनड्वान् सौरभेयो गौः, उक्ष्णां संहतिरौक्षकम् ।
वृषो[2] महान् महोक्षः स्याद्, वृद्धोक्षस्तु जरद्गवः ॥१९॥

कृषकः कर्मकारश्च वित्सरो[3] वृषभे मतः ।
गवराजो महोक्षः स्यात्, निर्धनस्तु जरद्गवः ॥२०॥

---

1. वौकका-A
2. 'उक्षा' इत्यमरः ।
3. वित्सलो-B

उत्पन्न उक्षा जातोक्षः, सद्योजातस्तु तर्णकः ।
जातोक्षे प्राप्तभावः स्यात्, सद्योभावी तु तर्णके ॥२१॥

शकृत्करिस्तु वत्सः स्यात्, दम्यवत्सतरौ समौ ।
आर्षभ्यः शण्डतायोग्यः, शण्डो गोपतिरिट्चरः ॥२२॥

अवेश्यो वत्सके प्रोक्तः, शण्डे षण्डः[1], प्रकीर्त्तितः ।
माहेयी सौरभेयी गौरुस्रा माता च शृङ्गिणी ॥२३॥

अर्जुन्यघ्ना रोहिणी स्यात्, उत्तमा गोषु नैचिकी ।
सौरभेय्यां भवेद् भद्रा नैचिक्यां चिक्वणा मता ॥२४॥

वर्णादिभेदात् संज्ञाः स्युः शवली धवलादयः ।
शवल्यां शवली ज्ञेया धवली धवलापि च ॥२५॥

द्विहायनी द्विवर्षा गौरेकाब्दा त्वेकहायनी ।
वशा वन्ध्या, ऽवतोका तु स्रवद्गर्भाऽथ[2] सन्धिनी ॥२६॥

आक्रान्ता वृषभेणाथ, वेहद्गर्भोपघातिनी ।
अवतोका वृथा यात्रा सन्धिन्यां सङ्क्रमाऽपि च ॥२७॥

काल्योपसर्या प्रजने, प्रष्ठौही बालगर्भिणी ।
स्यादचण्डी तु सुकरा, बहुसूतिः परेष्टुका[3] ॥२८॥

प्रष्ठौह्यां बुध्दुशा ख्याता, ऽचण्ड्यान्तु गोकला खशा ।
चिरसूता वष्कयिणी, धेनुः स्यान्नव सूतिका ॥२९॥

सुव्रता सुखसन्दोह्या, पीनोध्नी पीवरस्तनी ।
अविश्वासा वष्कयिण्यां, सुव्रतायां रुणष्करा ॥३०॥

द्रोणक्षीरा द्रोणदुघा, धेनुष्या बन्धके स्थिता ।
द्रोणक्षीरा द्रोणमाला द्रोणघा च पयस्विनी ॥३१॥

---

1. षण्डे-B
2. तु-B
3. 'परेष्टुका इत्यपरः ।

समांसमीना सा यैव प्रतिवर्षं प्रसूयते ।
तत्रापि कथिता धीरैरुत्काका च समीनिका ॥३२॥

चक्रीवन्तस्तु वालेया रासभाः गर्दभाः खराः ।
द्विधा ते धवलाः कृष्णाः धवला घूर्णमाश्चलाः ॥३३॥

कृष्णाश्च कृतकाः खर्पाः टुण्टुकाः परिकीर्त्तिताः ।
अजा छागी, स्तभच्छागबस्तछगलका अजः ॥३४॥

मेढ्रोरभ्रोरणोर्णायुमेषवृष्णाय एडकाः ।
शुभेक्षणक इत्युक्तो मेढ्रेऽजामेह इत्यपि ॥३५॥

कौलेयकः सारमेयः कुक्कुरो मृगदंशकः ।
शुनको भषकः श्वा स्यात्, अलर्कस्तु स योगितः ॥३६॥

श्वा विश्वकद्रुर्मृगयाकुशलः, सरमा शुनी ।
ग्रामपालः सारमेये, सरमायां कुलाक्षुता ॥३७॥

स्त्रियां शिवा भूरिमायगोमायुमृगधूर्त्तकाः ।
शृगालवञ्चकक्रोष्टुफेरुफेरवजम्बुकाः ॥३८॥
श्रृगालः सृगालः सृकालः श्रृकाले ॥

ओतुर्बिडालो मार्जारो बृषदंशक आखुभुक् ।
व्याघ्रास्यो मन्दिरपशुः पयस्यो वृषदंशके ॥३९॥

त्रयो गौधारगौधेरगौधेया गोधिकात्मजे ।
श्वावित्तु शल्यस्तल्लोम्नि शलली शललं शलम् ॥४०॥

शल्ये मतः शल्यकण्टः, शलले सूचिकास्यकम् ।
वातप्रमीर्वातमृगः, कोक ईहामृगो वृकः ॥४१॥

मृगे कुरङ्गवातायुहरिणाजिनयोनयः ।
व्याधभीतः सुनयनः प्लवङ्गः क्रव्यघातनः ॥४२॥

ऐणेयमेण्याश्चर्माद्यम्, एणस्यैणमुभे त्रिषु ।
कदलीकन्दली चीनश्चमूरुप्रियकावपि ।।४३।।

सृमरश्चेति हरिणा अमी अजिनयोनयः ।
कृष्णसाररुरुन्यङ्कुरङ्कुशम्बररौहिषाः ।।४४।।

गोकर्णपृषतैणर्श्यरोहिताश्चमरो मृगाः ।
गन्धर्वः शरभो रामः सृमरो गवयः शशः ।।४५।।

शमनः खलुरेषश्च पार्वणः फुल्ललोचनः ।
वनस्थः सागरोविस्तु विकारः कृकशस्तथा ।।४६।।

इत्यादयो मृगेन्द्राद्या, गवाद्याः पशुजातयः ।
उन्दुरुर्मूषिकोऽप्याखुः, गिरिका वालमूषिका ।।४७।।

सरटः कृकलासश्च, मुषली गृहगोधिका ।
उन्दुरौ कथितश्चण्डूः, सरटे साञ्जनोऽपि च ।।४८।।

लूता स्त्री तन्तुवायोर्णनाभमर्कटकाः समाः ।
नीलाङ्गुस्तु क्रिमिः कर्णजलौकाः शतपद्युभे ।। ४९ ।।

क्रिमौ कृमिः समाख्यातः कारुण्डी च जलौकसि ।
वृश्चिकः शूककीटः स्यात् अलिद्रुणौ तु वृश्चिके ।। ५० ।।

शूककीटे च कण्ड्वोघो वृश्चिके चालिरित्यपि ।
पारावतः कलरवः कपोतोऽथ शशादनः ।। ५१ ।।

पत्री श्येनः उलूकस्तु वायसारातिपेचकौ ।
पारावते कलरवो दिवाभीतस्तु पेचके[1] ।। ५२ ।।

व्याघ्राटः स्यात् भरद्वाजः खञ्जरीटस्तु खञ्जनः ।
भारद्वाजो भारथः स्यात् सदानर्तस्तु खञ्जने ।। ५३।।

1. पेचकः B

लोहपृष्ठस्तु कङ्कः स्यादथ चासः किकीदिःवि ।
हृदयात्मा लोहपृष्ठे चरणश्चासके मतः ॥ ५४ ॥

कलिङ्गभृङ्गधूम्याटा अथ स्याच्छतपत्रके ।
दार्वाघाटोऽथ सारङ्गस्तोककश्चातकः समाः ॥ ५५ ॥

कलिङ्गे दीर्घपक्षः स्यात् चातके मेघचिन्तकः ।
कृकवाकुस्ताम्रचूडः कुक्कुरश्चरणायुधः ॥ ५६ ॥

पुच्छी प्रकाशको ज्ञाता चात्मघोषो रसाखनः ।
चटकः कलविङ्कः स्यात् तस्य स्त्री चटका तयोः ॥ ५७ ॥

पुमपत्ये चाटकैरः स्त्र्यपत्ये चटकैव हि ।
कर्करेटुः करेटुः स्यात् कृकणक्रकरौ समौ ॥ ५८ ॥

चटके बहुशक्रः[1] स्यात् कर्करेटौ च कर्कटः ।
वनप्रियः परभृतः कोकिलः पिक इत्यपि ॥ ५९ ॥

मधुस्वरो मधुबलो लोहिताक्षोऽचलद्विषः ।
काके तु करटारिष्टबलिपुष्टसकृत्प्रजाः ॥ ६० ॥

ध्वाङ्क्षात्मघोषपरभृद्बलिभुग्वायसा अपि ।
नगौको धूर्त्त एकाक्षः प्रतिभोक्ता दिवाकरः ॥ ६१ ॥

द्रोणकाकस्तु काकोलो दात्यूहः कालकण्टकः ।
द्रोणकाके च द्रोणः स्यात् दात्यूहे च (?) साध्वनिः ॥ ६२ ॥

आतायिचिल्लौ दाक्षाय्या[2]गृध्रौ कीरशुकौ समौ ।
आतायिनि स्यात् सत्काण्डः[3] कीरे दाडिमभक्षणः ॥ ६३ ॥

---

1. बहुशुक्रः (?)
2. दाक्षाय्य (?)
3. संकाण्डः-A

क्रुङ्क्रौन्चोऽथ बकः कह्वः पुष्कराह्वस्तु सारसः ।
कोकश्चक्रश्चक्रवाको रथाङ्गाह्वयनामकः ।। ६४ ।।

चक्रवाके वियोगी स्याद् बके च दीर्घकण्टकः ।
कादम्बः कलहंसः स्यात् उत्क्रोशकुररौ समौ ।। ६५ ।।

कादम्बे हंसमाला स्यात् कुररे कुलचारकौ ।
हंसास्तु श्वेतगरुतश्चक्राङ्गा मानसौकसः ।। ६६ ।।

राजहंसास्तु ते चन्चुचरणैर्लोहितैः सिताः ।
मलिनैर्मल्लिकाख्यास्ते, धार्तराष्ट्राः सितेतरैः ।। ६७ ।।

हंसेषु मन्दयानिय्या, राजहंसेषु हंसकः ।
शरारिराटिराडिश्च, बलाका बिसकण्ठिका ।। ६८ ।।

शरारौ वुकलो हिल्लो, बलाकायान्च शुक्तिका ।
हंसस्य योषिद् वरटा, सारसस्य तु लक्षणा[1] ।। ६९ ।।

जतुकाऽजिनपत्रा स्यात्, परोष्णी तैलपायिका ।
जतुकायां रजागात्री, परोष्ण्यां यकृदात्मिका ।।७०।।

ववंणा मक्षिका नीला सरघा मधुमक्षिका ।
पतङ्गिका पुत्तिका[2] स्याद्, दंशस्तु वनमक्षिका ।।७१।।

दंशी तज्जातिरल्पा स्याद्, गन्धोली वरटा द्वयोः ।
वर्वणायां वलाटुः स्याद् वरटायामिडाचिका ।।७२।।

भृङ्गारी झीरुका चीरी झिल्लिका च समा इमाः ।
समौ पतङ्गशलभौ, खद्योतो ज्योतिरिङ्गणः ।।७३।।

झिल्लिकायां फडिङ्गा स्याद् खद्योते गुह्यदीपकः ।
मधुव्रतो मधुकरो मधुलिण् मधुपालिनः ।।७४।।

1. लक्ष्मणा (?)
2. पत्तिका-B

द्विरेफः पुष्पलिड्भृङ्गः षट्पदभ्रमरालयः ।
मधुनेता पुष्पलिक्षः पद्मबन्धुश्च गुञ्जकृत् ।।७५।।

मयूरो बर्हिणो बर्हीं नीलकण्ठो भुजङ्गभुक् ।
शिखालयः शिखी केकी मेघनादानुलास्यपि ।।७६।।

चन्द्रकी शुक्रभुक् कान्तपक्षी केकावलोऽपि च ।
केका वाणी मयूरस्य, समौ चन्द्रकमेचकौ ।।७७।।

शिखा चूडा, शिखण्डस्तु पिच्छवर्हे नपुंसके ।
शिरोवल्ली च चूडायां, मेचके गूषणापि च ।।७८।।

खगे विहङ्गविहगविहङ्गमविहायसः ।
शकुन्तिपक्षिशकुनिशकुन्तशकुनद्विजाः ।।७९।।

पतत्रिपत्रिपतगपतत्पत्ररथाण्डजाः ।
नगौकोवाजिविकिरविविष्करपतत्रयः ।।८०।।

नीडोद्भवा गरुत्मन्तः पिच्छलो नभसङ्गमाः ।
यथेष्टचारी द्योभूमिः पक्षालुः पक्षवाहनः ।। ८१ ।।

त्रोटिहस्तः कुलायस्थः फत्कारी फूक इल्ललः ।
तेषां विशेषा हारीतो मद्गुः कारण्डवः प्लवः ।। ८२ ।।

तित्तिरिः कुक्कुभो लावो जीवंजीवश्चकोरकः ।
कोयष्टिकष्टीडिभको वर्तको वर्तिकादयः ।। ८३ ।।

मदनः कञ्जनो नीलः कञ्जकः कज्जलोऽञ्जनः ।
माजनश्चासकः कुब्जो विहारो बिन्दुरेखकः ।। ८४ ।।

शरमल्लः क्षुद्रचूडो गूथलक्तश्च साल्विकः ।
पद्मपुष्पः पिकाङ्गोऽकुश्छत्रको मत्स्यरङ्गकः ।। ८५।।

हरिद्राङ्गो विदिक्चङ्गो वणिगधुः शरणोद्भुजः ।
स्वरभङ्गी नरो दृङ्क्षुरिरुट् शकुलभेदकाः ॥ ८६ ॥

गरुत्पक्षच्छदाः पत्रं पतत्रञ्च तनूरुहम् ।
देहधिर्देहकोषश्च वाहुकुन्दश्च कथ्यते ॥ ८७ ॥

स्त्री पक्षतिः पक्षमूलं, चञ्चुस्त्रोटिरुभे स्त्रियौ ।
पक्षतौ पक्षती चापि चञ्चौ चञ्चूश्च कीर्त्तिता ॥ ८८ ॥

प्रडीनोड्डीनसंडीनान्येताः खगगतिक्रियाः ।
पेशी कोषी द्विहीनेऽण्ड, कुलायो नीडमस्त्रियाम् ॥ ८९ ॥

पोतः पाकोऽर्भको डिम्भः पृथुकः शावकः शिशुः ।
स्त्रीपुंसौ मिथुनं द्वन्द्वं युग्मन्तु युगलं युगम् ॥ ९० ॥

अण्डे डिम्भोऽर्भके जातो युगले [1] चोभयमित्यपि ।
समूहनिवहव्यूहसन्दोहविसरव्रजाः ॥ ९१ ॥

स्तोमौघनिकरव्रातवारसङ्घातसञ्चयाः ।
समुदायः समुदयः समवायश्चयो गणः ॥ ९२ ॥

स्त्रियां तु संहतिर्वृन्दं निकुरुम्बं कदम्बकम् ।
जालं स्कन्धः पूगकाण्डौ व्यूढिः सन्नयवायकौ ॥ ९३ ॥

बृन्दभेदाः समैर्वर्गः, संघसार्थौ तु जन्तुभिः ।
सजातीयैः कुलं, यूथं तिरश्चां पुंनपुंसकम् ॥९४॥

पशूनां समजोऽन्येषां समाजोऽथ सधर्मिणाम् ।
स्यान्निकायः, पुञ्जराशी तूत्करः कूटमस्त्रियाम् ॥९५॥

संघे वृद्धिः, कुले गोत्रं, पुञ्जे तु पुङ्गमस्त्रियाम् ।
कापोतशौकमायूरतैत्तिरादीनि तद्गणे ।
गृहासक्ताः पक्षिमृगाश्छेकास्ते गृह्यकाश्च ते ॥९६॥

इति सिंहादिवर्गः ॥६॥

1. युग्मे (?)

७. मद्यादिवर्गः

सुरा हरिप्रिया[1] हाला परिस्रुद् वरुणात्मजा ।
गन्धोत्तमा प्रसन्नेरा कादम्बर्यः परिस्रुता ॥१॥

मदिरा कश्यमद्ये चाप्यवदंशस्तु भक्षणम् ।
महाघूर्णो देहला च सुरायां मद इत्यपि ॥२॥

शुण्डापानं मदस्थानं मधुवाराः मधुक्रमाः ।
शुण्डायां कुकभं पीति मधुवारेषु मध्वनाः ॥३॥

मध्वासवो माधवको मधु माध्वीक[2]मद्वयोः ।
मध्वासवे वलैतकिकं मधुलं गुडलं तलम् ॥४॥

मैरेयमासवः शीधुर्मेदको जगलः समौ ।
मैरेये स्याच्च धातक्यामासवे तोबदं मतम् ॥५।

शीधावैक्षवमित्युक्तं तत्रापि हीलुकं मतम् ।
सन्धानं स्यादभिषवः किण्वं पुंसि तु नग्नहूः ॥६॥

सन्धाने सूत्परं प्रोक्तं किण्वेऽन्तर्दधनं विपम् ।
कारोत्तरः सुरामण्ड आपानं पानगोष्ठिका ॥७॥

चषकोऽस्त्री पानपात्रं सरकोऽप्यनुतर्षणम् ।
अवन्तिसोमधान्याम्लकुञ्जलानि च काञ्जिकम् ॥८॥

आरनालकसौवीरकुल्मासाभियुतानि[3] च ।
तुषोदकं पक्ववारिवातीयं तण्डुलोत्परम् ॥९॥

सुपक्वमुच्यते सुप्तं धान्याम्लं वासितं गुडैः ।
तिलतण्डुलमाषैर्या यावागूः सा च शष्कुली (?) ॥१०॥

---

1. 'हलिप्रिया' इत्यमरः ।
2. 'मार्द्वीक' इत्यमरः ।
3. षुतानि (?)

दुग्धेन[1] तण्डुलं पक्वं सतिलं कृशरो मतः ।
आतप्ततण्डुलं धौतं परिभृष्टं घृतेन च ॥११॥

खण्डयुक्तेन दुग्धेन पाचितं पायसो भवेत् ।
परमान्नञ्च तस्याख्या कथ्यते शास्त्रदर्शिभिः ॥१२॥

भृष्टजीरचतुर्जातैश्चन्द्रकान्तः सुरोचनः ।
पूपोऽपूप पिष्टकः स्यात् वैदलो विदलोऽपि च ॥१३॥

पाकमत्स्यो मत्स्यलञ्च मत्सगण्टो[2] गलग्रहः ।[3]
पलालवेष्टितो मत्स्यः कर्दमेन च लेपितः ॥१४॥

दग्ध्वाङ्गारे सलवणो वेशवारैरुपस्कृतः ।
सार्द्रकः कटुतैलेन मत्स्यसन्तानिको भवेत् ॥१५॥

मांसं बहुघृते भृष्टं सिक्त्वा चोष्णाम्बुना मुहुः ।
जीरकाद्यैः समायुक्तं परिशुष्कं तदुच्यते ॥१६॥

तदेव घृततक्राढ्यं प्रदिग्धं सत्रिजातकम् ।
मांसन्तु शूलिकं प्रोक्तमङ्गारपरिपाचितम् ॥१७॥

निरस्थि पिशितं पिष्टं स्विन्नं गुडघृतान्वितम् ।
कृष्णामरिचसंयुक्तं वेशवार इति स्मृतः ॥१८॥

ससिताः समिताः क्षीरनारिकेले सितादिभिः ।
अवगृह्य घृते पक्त्वा घृतपूरोऽयमुच्यते ॥१९॥

समिता मधुदुग्धेन[4] खण्डेन मरिचादिभिः ।
घृते पक्त्वा क्षिपेत् खण्डं संयावो बृंहणो गुरुः ॥२०॥

---

1. मुद्गेन (?)
2. मत्स्यगण्टो (?)
3. प्रथमद्वयं मत्स्यव्यञ्जनम्, शेषद्वयं मत्स्यघण्ट इति ख्याते ।
4. समधदुग्धेन-B.

मधुतैलघृतैर्मध्ये वेष्टिताः समिताश्च ये ।
मधुमस्तकमुद्दिष्टं तस्याख्या परिमार्जनम् ॥२१॥

घृतेन भृष्टं गोधूमचूर्णं चूलिकमुच्यते ।
माषेण तण्डुलं चूर्णं जलैः पक्वञ्च पर्पटी ॥२२॥ चुकनी ।

केवलं तण्डुलं चूर्णं जलैः पक्वञ्च फेनका । असिका ।
कदलेनाथ वा तालैर्युक्तं यत्ताण्डुलं पिडम् ॥२३॥

गौधूमं वा घृतैर्भृष्टं तैलेनाथ वटः स्मृतः । पिंडचूर्णं वटोवडा ।
तैलेन हविषा वापि पक्वं चूर्णञ्च लड्डुकम् ॥२४॥

स्यात्तेमनं तु निष्ठानं व्यञ्जनं भक्तसङ्गतम् ।
पृथुकः स्याच्चिपिटको धानाः स्त्री भूम्नि वाडकम् ॥२५॥[1]

भृष्टान्नं कुहरं न्याक्यं लाजाः पुंभूम्नि चाक्षतम् ।[2]
भिस्सा स्त्री भक्तमन्धोऽन्नमोदनोऽस्त्री सदीदिविः ॥२६॥[3]

भिस्सटा दग्धिका ज्वाला भिस्सायान्तु विसक्ष्यका ।[4]
मण्डो मूर्धारसो यूषो लासो जुष्टक[5] इत्यपि ॥२७॥[6]

मासरा च मणिस्रावा मण्डे भक्तसमुद्भवे ।
यवागूरुष्णिका श्राणा विलेपी तरला च सा ॥२८॥

---

1. आद्यद्वयं चिडा, शेषद्वयं भृष्टयव ।
2. प्रथमत्रयं मुडी, शेषद्वयं खई ।
3. षट् अन्ने ।
4. भिस्सटादित्रयं दग्धान्ने ।
5. नासो यूषो जुष्टक–B
6. प्रथमद्वयं अन्नदिजनितमण्डे, मध्यद्वयं मुद्गादिजनितरसे शीषद्वयं मुद्गादिजनित यूषे ।

रुष्णिकायां[1] कुधारायां विलेपी तु विलोत्थिका ।
पेया जलाशा सिक्थाढ्या गकुला च प्रकीर्त्तिता २९॥[2]

क्षुद्रिका सिक्थकं खण्डमन्नखण्डञ्च सिक्थिका ।
। अन्नखण्ड. सिक्थकम् ।
अन्नं पञ्चगुणे साध्यं विलेपी च चतुर्गुणे ॥३०॥

मण्डश्चतुर्दशगुणे यवागूः षड्गुणेऽम्भसि ।
सिक्थकैः रहितो मण्डः पेया सिक्थसमन्विता ॥३१॥

यवागूर्बहुसिक्था स्यात् विलेपी विरलद्रवा ।
सक्तुश्च दुग्धिका चापि चूर्णं भृष्टयवस्य यत् ॥३२॥

इति मद्यादिवर्गः ॥७॥

८ पञ्चकषायादिवर्गः

स्वो रसः स्वरसः प्रोक्तः कल्को दृषदि पेषितः ।
क्वथितस्तु शृतः शीतः सर्वरात्र्युषितो मतः ॥१॥

क्षिप्त्वोष्णतोये मृदितः फाण्ट इत्यभिधीयते । इति पञ्चकषायाः ।
वस्तिर्नस्यं रक्तमोक्षो वमनञ्च विरेचनम् ॥२॥

पञ्च कर्माणि कथ्यन्ते योगयोगीनि सर्वदा ।
भेषजौषधभैषज्यं रोगहं रोगिवल्लभम् ॥३॥

अयोग्रो मुसलोऽस्त्री स्यादुदूखलमुलूखलम् ।
प्रस्फोटनं शूर्पमस्त्री चालनी तितउ. पुमान् ॥४॥

लौहभाण्डोऽश्ममालं स्यात् खल्लं पेषणमित्यपि[3] ।
अजाशकृत्तुषाग्निञ्च खानयित्वा भुवि क्षिपेत् ॥५॥

---

1. उष्णिकायां (?)
2. विलेपी अन्नजनितद्रवे, पेया अतिद्रवे ।
3. लौहभाण्डादिद्वयं हामानदिस्ता, खल्लादिद्वयं खल ।

अस्योपरि स्थितं खल्लं तप्तखल्लमिति स्मृतम् ।
पाषाणप्रस्तरग्रावोपलाश्मानः शिला दृषत् ॥६॥

लौहात्मा चायुगा लौहा लौहभूः काठनीत्यपि ।
अश्मन्तमुद्धानमधिश्रयणी चुल्लिरन्तिका ॥७॥

चुल्ली सुखाना खीलाना स्थाल्याधा सद्मनार्पिका । चूला ।
अङ्गारधानिकाऽङ्गारशकट्यपि हसन्त्यपि ॥८॥

हसन्त्यथ न ना स्त्री स्यादङ्गारोऽलातमुल्मुकम्[1] ।
मुर्भिनी च हसन्त्यां स्यादङ्गारे ज्वलिताङ्गरः ॥९॥
अङ्गारधानी आङ्गरा ।

क्लीबेऽम्बरीषं वाष्ट्रो[2] ना कन्दुर्वा खेदनी स्त्रियाम् ।
भृष्टश्विरम्बरीषे स्यात् कन्दौ च बहुली स्वसा ॥१०॥
अम्बरीषं भर्जनपात्रं कन्दुस्तायनीति लोके ।

अलिञ्जरः स्यान्मणिकं कर्कर्यालुर्गलन्तिका ।
अलिञ्जरे च मणिकं कर्कर्यां द्विमुखार्गला ॥११॥

पिठरः स्थाल्युखा कुण्डं कलसस्तु त्रिषु द्वयोः ।
घटः कुटनिपावस्त्री शरावो वर्धमानकः ॥१२॥

पिठरे कुण्डिका पाली शरावे कूर्मपृष्ठकम् ।
ऋजीषं पिष्टपचनं कंसोऽस्त्री पानभाजनम् ॥१३॥

कुतूः कृत्तिः स्नेहपात्रं सैवाल्पा कुतपः पुमान् ।
ऋजीषे खल्लिका कंसे पाणिलं परिकीर्त्तितम् ॥१४॥

सर्वभावपनं भाण्डं पात्रामत्रञ्च भाजनम् ।
सामान्यभाण्डशब्दोऽपि विशेषे सन्निरीक्ष्यते ॥१५॥

---

1. मुल्मुकम्-B
2. भ्राष्ट्रः इत्यमरः ।

दर्विः कम्विः खजाका च स्यात्तद्‌र्दुर्दारुहस्तकः ।
दर्वी कम्बी खजायां तु तद्दौं च तदरुश्छरुः ।।१६।।

छिद्रं निर्व्यथनं रोकं रन्ध्रः श्वभ्रं वपा शुषि ।
कुहरं शुषिरं छिद्रं विवरं रुहकं बिलम् ।।१७।।

गर्तावटौ भुवि श्वभ्रे सरन्ध्रं शुषिरं त्रिषु ।
यन्त्रं विलालं ताम्बी च मूषिका तु शिलात्मिका ।।१८।।[1]

जलकच्छपपातालदोलाभूधरवालुकाः ।
नकाद्या यन्त्रभेदाः स्युर्वज्रान्धाद्याश्च मूषिकाः ।।१९।।

पिचुर्मापनतूलौ च पाषाणी तु पृषाकरा[2] ।
पौतवं द्रुवयं पार्य्य[3]मिति मानार्थकं त्रयम् ।।२०।।

जालान्तरगते भानौ यच्चाणुर्दृश्यते रजः ।
तैश्चतुर्भिर्भवेल्लिख्या लिख्याषड्भिश्च सर्षपः ।।२१।।

षट्सर्षपैर्यवस्त्वेको गुञ्जैका तु यवैस्त्रिभिः ।
गुञ्जाभिर्दशभिर्माषः शाणो माषचतुष्टयम् ।।२२।।

कोलार्धक इति ख्यातः स निष्कः टङ्क एव च ।
शाणौ द्वौ वटकः कोलस्तोलको द्रङ्क्षणश्च सः ।।२३।।

तोलौ द्वौ पिचुरक्षश्च सुवर्णं कवडग्रहः ।
बिडालपदकर्षौ च पाणितलमुदुम्बरम् ।।२४।।

कर्षद्वयेन शुक्तिः स्यात् सा चार्धपलमुच्यते ।
तद्द्वयञ्च पलं मुष्टिः प्रस्थञ्च बिल्वमित्यपि ।।२५।।

---

1. आद्यद्वय यन्त्रे, शेषद्वयं मूषिकायाम् ।
2. आद्यत्रयं तूल शेषद्वयं बांटखरा ।
3. पाय्यय (?)

तद्द्वयं प्रसृतं विद्यात् तत्प्रमाणक पद्यपि ।
पलैश्चतुर्भिराख्यातः कुडवोऽञ्जलिरित्यपि ।।२६।।

कुडवौ द्वौ शरावः स्यात् मानिकाष्टौ पलानि च ।
पलैः षोडशभिः प्रस्थस्तैश्चतुर्भिस्तथाढकम् ।।२७।।

कंसो भाजनपात्रञ्च चतुःषष्टिपलञ्च सः ।
चतुर्भिराढकैर्द्रोणः कलसो नल्वणोऽर्मणः ।।२८।।

उन्मानञ्च घटो राशिः षट्पञ्चाशत् शतद्वयम् ।
द्रोणद्वयेन शूर्पः स्यात् स कुण्ड इति कीर्त्तितः ।।२९।।

शूर्पस्य द्विगुणा गोणी खारी गोणी चतुर्गुणा ।
तुला पलशतं ताभिर्विंशत्या भार उच्यते ।।३०।।

स्त्री रुग्रुजा चोपतापरोगव्याधिगदामयाः ।
विकारो विकरो देहक्षयो दोषिक इत्यपि ।।३१।। रोग ।

आतुरो विकृतो रोगी व्याधितोऽभ्यमितोऽपटुः ।
पुनरोऽभ्यान्तसानन्ता वामयावी विलन्मनाः ।।३२।। रोगी ।

वार्तो निरामयः कल्यः उल्लाघो निर्गतो गदात् ।
अनामयं स्यादारोग्यं चिकित्सा रुक्प्रतिक्रिया ।।३३।।

आरोग्ये सुस्थतोत्पार्णा चिकित्सायां परान् मया।
रोगहार्यगदङ्कारो भिषग्वैद्यो चिकित्सके ।।३४।।

ओषधीप्रेषणानीतो भिषको रोगशान्तकः ।
वटिका निस्तनी चूर्ण क्षोदितं चक्रिका चुता[1] ।।३५।।
अनुपानं भेषजाङ्गं पथ्यन्तु करणं हितम्[2] ।
अपथ्यमहितं रोग्यं क्षामास्यं परिकीर्त्तितम् ।।३६।।

इति पञ्चकषायादि वर्गः ।।८।।

---

1 आद्यद्वयं वडि, मध्यद्वयं चूर्ण, शेषद्वयं चाकि ।
2. आद्यद्वयमनुपाने, शेषत्रयं पथ्ये ।

९. त्रिफलादिवर्गः

हरीतकी आमलकी विभीतकमिति त्रयम् ।
त्रिफला फलमित्युक्तं तच्च ज्ञेयं फलत्रिकम् ॥१॥

द्राक्षापरुषकाश्मर्यः फलत्रयमुदाहृतम् ।
विडङ्गमुस्तचित्रैस्तु त्रिमदः समुदाहृतः ॥२॥

पिप्पली मरिचं शुण्ठी त्रयमेतत् विमिश्रितम् ।
त्रिकटु त्र्यूषणं व्योषं कटुत्रिकमथोच्यते ॥३॥

ग्रन्थिकानलचव्यैस्तु चतुःपञ्च षडूषणम् ।
चविका चित्रकं नागपिप्पली त्र्यूषणं मतम् ॥४॥

त्रिगन्धमेलात्वक्पत्रैस्त्रिसुगन्धं त्रिकोलकम् ।
चतुर्जातं तदेव स्यान्नागकेशरकेशरैः ॥५॥

नागरातिविषा मुस्तं त्रयमेतद्विमिश्रितम् ।
गुडूचीसंयुतं तच्च चातुर्थकमुदाहृतम् ॥६॥

पञ्चकोलं कणामूलकृष्णाचव्याग्निनागरैः ।
न्यग्रोधोदुम्बराश्वत्थप्लक्षवेतसवल्कलैः ॥७॥

सर्वैरेकत्र संयुक्तैः पञ्चवल्कलमुच्यते ।
न्यग्रोधोदुम्बराश्वत्थप्लक्षपिप्पलपीतनाः ॥८॥

क्षीरिवृक्षाश्च पञ्चैषां वल्कलं पञ्चवल्कलम् ।
क्वचिच्च पीतनस्थाने शिरीषो वायसः क्वचित् ॥९॥

उदुम्बरो वटोऽश्वत्थो मधूकः प्लक्ष एव च ।
पञ्चैते क्षीरिणो वृक्षाः संज्ञया परिकीर्त्तिताः ॥१०॥

कोलदाडिमवृक्षाम्लैरम्लवेतससंयुतैः ।
चतुरम्लञ्च पञ्चाम्लं मातुलुङ्गसमन्वितम् ॥११॥

पञ्चगव्यं दधिक्षीरघृतगोमूत्रगोमयैः ।
पञ्चनिम्बन्तु तत्पुष्पमूलवल्कफलच्छदैः ॥१२॥

आम्रजम्बूकपित्थानां बीजपूरकबिल्वयोः ।
गन्धकर्मणि सर्वत्र पत्राणि पञ्चपल्लवम् ॥१३॥

सौवर्चलं सैन्धवञ्च विडसामुद्रमौद्भिदम् ।
एकद्वित्रिचतुःपञ्च लवणानि क्रमादिह ॥१४॥

शालपर्णी पृश्निपर्णी बृहती कण्टकारिका ।
तथा गोक्षुरकञ्चैव पञ्चमूली कनीयसी ॥१५॥

बिल्वाग्निमन्थश्योनाककाश्मर्यः पाटला तथा ।
ज्ञेयं बृहत्पञ्चमूलं पञ्चमूलमिति स्मृतम् ॥१६॥

कुशकाशशरेक्षूणां नलकस्य च मूलकम् ।
शरेक्षुदर्भकाशानां नलस्य मूलमेव च ॥१७॥

सौश्रुतक्षारकश्चैव[1] तृणाख्यं पञ्चमूलकम् ।
वमनं रेचनं नस्यं निरूहञ्चानुवासनम् ॥१८॥

पञ्चकर्मेदमन्यच्च कवडक्षेपणादिकम् ।
महाभूतानि पञ्चैव खानिलाग्न्यम्बुभूमिभिः ॥१९॥

शब्दस्पर्शौ रूपरसौ गन्धश्च क्रमशो गुणाः ।
पञ्चेन्द्रियार्थाः पञ्चैव विषयाः गोचराणि च ॥२०॥

श्रोत्रत्वक्नेत्रवदनघ्राणं पञ्चेन्द्रियाणि च ।
जङ्घे बाहू शिरोमध्यं षडङ्गमिदमुच्यते ॥२१॥

प्रत्यङ्गं कर्णनासाक्षिलिङ्गगाङ्गानि करादिकम् ।
कुसुमानि लवङ्गस्य तथा कक्कोलकागुरोः ॥२२॥

---

1. सौश्रुतञ्चारकञ्चैव (?)

जातीफलानि कर्पूरमेतत् पञ्चसुगन्धकम् ।
अवेर्मूत्रमजामूत्रं गोमूत्रं माहिषञ्च तत् ।।२३।।

हस्तिमूत्रं तथोष्ट्रस्य हयस्य च खरस्य च ।
एतानि चाष्टमूत्राणि प्रवदन्ति मनीषिणः ।।२४।।

तिलकं तैलसर्पिभ्यां सञ्जातमञ्जसंयुतम् ।
त्रिस्नेहस्त्रय[1] सम्प्रोक्तो महास्नेहो वसान्वितः ।।२५।।

शुण्ठीमरिचपिप्पल्यो धन्याकाजाजिदाडिमम् ।
पिप्पलीमूलसंयुक्तो वेशवार इति स्मृतः ।।२६।।

ऋषभो जीवको मेदा महामेदर्ध्दिवृद्धिकाः ।
काकोली क्षीरकाकोलीत्यष्टवर्गः प्रकीर्त्तितः ।।२७।।

द्राक्षादाडिमखर्जूरमृदिताग्रं सशर्करम् ।
जालचूर्णं समध्वाज्यं सप्तपर्णमुदाहृतम् ।।२८।।

पृश्निपर्णी श्यामलता भृङ्गराजः शतावरी ।
गुडूची सहदेवा च महौषधिगणः स्मृतः ।।२९।।

मुरा मांसी बचा कुष्ठं शैलेयं रजनीद्वयम् ।
शटीचम्पकमुस्तञ्च सर्वौषधिगणः स्मृतः ।।३०।।

निर्गुण्डी तुलसी ब्राह्मी बृहती कण्टकारिका ।
पुनर्नवेति मुनिभिः सुरसाष्टः प्रकीर्त्तितः ।।३१।।

चतुर्जातककक्कोललवङ्गागुरुसिल्हकम् ।
सर्वगन्धमिदञ्चाग्र्यं मुनिभिः परिकीर्त्तितम् ।।३२।।

कर्पूरागुरुकक्कोलैः कस्तूरी कुङ्कुमैः सह ।
रास्ना सहा सुगन्धाख्यः ख्यातोऽयं यक्षकर्दमः ।।३३।।

---

1. स्तत्र (?)

मधुरोऽम्लश्च लवणः कषायस्तिक्तकः पटुः[1] ।
षडमी च रसाः पूर्वं मुनिभिः परिकीर्त्तिताः ॥३४॥

देवदारु हरिद्रे द्वे वरुणः कुष्ठमेव च ।
महानिम्बं नागबला श्यामा नागमलोत्सरः ॥३५॥

पाटला चात्मगुप्ता च शुण्ठी पाषाणभेदिका ।
शतावरी चार्कमूल गुडूची गणिकारिका ॥३६॥

पुनर्नवा च वास्तूक सूर्यावर्तक कानतम् ।
गोक्षुरः शरमूलञ्च कुशमूलः समांशिकः ॥३७॥

ऊनचत्वारिंशद्द्रव्यैर्भद्रदार्वादिको गणः ।
रसासृङ्मांसमेदोऽस्थिमज्जशुक्राणि धातवः ॥३८॥

वातपित्तकफाः दोषाः विण्मूत्राद्यास्तु तन्मलाः ।
वयोऽग्नि[2] त्रिविधं ज्ञेयं वालमध्यमवृद्धतः ॥३९॥

प्राणोऽपानः समानश्चोदानव्यानौ च वायवः ।
पाचकं भ्राजकं चैव रञ्जकालोचके तथा ॥४०॥

साधकञ्चैव पञ्चेति पित्तनामान्यनुक्रमात् ।
क्लेदनः स्नेहनश्चैव रमणश्चावलम्बनः ॥४१॥

श्लेष्मक[3]श्चेति नामानि कफस्योक्तानि सूरिभिः ।
आसुरी मानुषी दैवी चिकित्सा त्रिविधा मता ॥४२॥
अलाभादधिकाख्याया मयोक्तं नेह यत् क्वचित् ।
शब्दार्णवादिकोषेभ्यस्तज्ज्ञातव्यं भिषग्वरैः ॥४३॥

इति त्रिफलादिवर्गः ॥

॥ इति श्रीचक्रपाणिदत्तविरचिता शब्दचन्द्रिका समाप्ता ॥

---

1. कटुः (?)
2. वयोऽपि (?)
1. श्लेषकः (?)

परिशिष्टम्

शब्दचन्द्रिकाया विषयसूची

(B पुस्तकस्यान्ते वङ्गीयभाषया वर्ण्यविषयाणां सूचीयं निवद्धा, सैवात्र यथातथं दीयते। यत्र-तत्र वहवोंऽशाः त्रुटिताः सन्ति ।)

यज्ञोडुमुर	तिनाश
रक्तकाञ्चन	आमडा
सोनालु	महुया बृक्ष
लिम्पाक	पीलु वृक्ष
मडकडी	कालियाकडा
नारांगी लेबू	वेतस
कमला लेबू	वयस
कामराङ्गा	तिलक
आता	जलवेतस
लोना	सजिना
चालता	हरिठा
परुष	श्रीफल
महाद	पाकडि
शिलायु	वटवृक्ष
वरुना	लोध
जिडली	आम्रवृक्ष
धन आंकडा	गुग्गुलु
वावला	बहुयारि वृक्ष
सेउडा	पियालवृक्ष
आश्वेउडा	बुंइची
पुन्नागवृक्ष	नाराङ्गवृक्ष
पालिघा मान्दार	भूमि जाम

गाब	मयना
मर्कट तिन्दुक	पारुलि
घण्टापारुलि	प्रियङ्गुवृक्ष
तिलाक	शोना
झाऊ	आमलकी
कट्फल	वयडा
क्रमुक	हरीतकी
ब्रह्मदारु	सरलवृक्ष
कदम्ब	डेडयावृक्ष
केलिकदम्ब	कांठालवृक्ष
भेला	ह्रिज्जलवृक्ष
गर्दमुण्डवृक्ष	डुमुरवृक्ष
तेतुल	निम्बवृक्ष
सालवृक्ष	शिंशपा
अर्जुनवृक्ष	शिरीष
क्षीरिवृक्ष	चम्पक
भूर्जवृक्ष	भूंइचांपा
शाल्मलि	नागकेशर
काशिममला	जयन्तीवृक्ष
फाँटा करञ्ज	गनियारि
रोहडा	कुडची
खदिर	इन्द्रयव
विष्ठागन्धि खदिर	पानि आमला
शुक्ल खदिर	तमाल वृक्ष
एरण्ड	निसिन्दा वृक्ष
बागा भरेण्डा	देवताडक
शाँई	हातिशुण्डावृक्ष

मल्लिका	विछूटी
शिडली वृक्ष	अपाङ्ग
यूथीवृक्ष	बामनहाटी
माधवीलता	मञ्जिष्ठा
मालती	दुरालभा
नेपाली	चाकुल्या
कुन्द	कण्टकारि
बान्धुनी	नोलीवृक्ष
सूर्यमणि	सोमराज
घृतकुमारी	पिप्पली
अम्लानवृक्ष	गजपिप्पली
धुस्तूर	चई
धुस्तूरफल	
टावा	कुचई
होनङ्ग	गोखुरि
रक्ततुलसी	आतईच
तुलसी	क्षिराई
वावुई	शतमूली
कृष्णवावुई	वच
क्षेतमुण्डीरी	वासक
आकन्द	मरिच
वकवृक्ष	जीरा
परसांडा	कृष्णजीरा
गुलञ्च	आदा
मूर्वा	धन्या
आकनादी	शुण्ठी
कटकी	हिङ्गु
आलकुशी	तत्पत्री

हरिद्रा	काकडासिंगी
अपराजिता	गोजिया
कुलेकडा	रेणुका
महुरी	एलवालुक
सिज	वाला
विडङ्ग	शैलेय
वाड्याला	मुरा
किचमिच्	शल्लकी
तेउडी	धाई फूल
कृष्णतेउडी	एलाइच
यष्टिमधु	गुजराटी एलाइच
भूमिकूष्माण्ड	लवङ्ग
कञ्चट	पीतकाष्ठ
मयूरशिखावृक्ष	अगुरु
श्यामालता	जायफल
ऋद्धि	जवित्री
कदली	धूना
मुगानी	कृत्रिम धूप
बेगुन	शिरा रस
रास्ना	लबान
शालपानि	मृगनाभि
कार्पास	खाटाशी
ऋषभ	कर्पूर
गोरक्षचाकुल्या	काँकला
घोषलता	क्षीरकाँकला
गोहालिया	मेद
तालमूली	महामेद

जीवक	नट्या
चन्दन	कोंचडा
हरिचन्दन	चाकन्दा
कृष्णचन्दन	शृगालकण्टक
रक्तचन्दन	कुकुरशोखा
चन्दनभेद	अग्निशिखा
कूठ	जुज्जोविद्यडक
चोरवहुली	ब्राह्मीसोमलता
भूम्यामलकी	स्वर्णक्षीरा
पुण्डरीकलता	ब्रह्मी
नन्दीवृक्ष	माषानी
रोचना	वर्वरावृक्ष
व्याघ्रनखी	एलापर्णी
नली	आमरुल
हट्टविलसिनी	अम्लवेतस
कांक्षीचिम्बी	वराक्रान्ता
कैवर्तमुता	जिंयति
गाँठिआन	सिद्धि
पिडङ्ग	चिराता
जटामांसी	चामारकषा
गुडत्वक्	दन्ती
तेजपात	यमानी
कर्पूरक	पुष्करमूल
मारिषशाक	पद्मचारिणी
कालकासुन्दा	हाडभाङ्गा
शालिचा	गुण्डारोचनी
गीमा	रक्तचाकन्दा

पेंयाज	रामदूति
रसुन	कुडकवालि
असनपर्णी	शीतली
फटकी	स्वल्पजीरा
बलमादनी	घृतमण्डा
वाराहीवृक्ष	ईशूलमूल
भृङ्गराज	आकनपाता
गुडकांडनी	सर्पकङ्काली
शैंलुपा	कतक
गन्धभादुल्या	उलु
तरमूज	मुजा
शसा	सूर्यशोभा
तिक्तलावु	हाफरमाली
राजगम	दुग्धपेया
गोरक्ष कॉंकड	लाजालुवृक्ष
ओल	वासकाली
शमठ	फणीमनसा
मुथा	तेकाँटा सिज
नागरमुथा	केशपुच्छा
छेंडायुथा	कुकुरमुडा
वंश	लङ्कासिज
वेडुवांस	
नल	खज्जालता
कुश	बेलशुंठा
इक्षु	पद्म
वेनारमूल	पद्मसमूह
देवजग्ध	श्वेतपद्म
वासकर्पूर	नीलपद्म

रक्तपद्म
सुँधि
रक्तसुँधि
उत्पल
कैरव
कुमुदसमूह
कठी
सेडला
पानिफल
शालूक
नाल
बिस
षण्ड
केशर
नवदल
बीजकोष
वृक्ष
शिफा
सुवर्ण
रजत
आरकूट
ताम्रक
पित्तल
कांस्यक
मृद्वङ्ग
वङ्ग
लौह

मण्डूर
शूलघातन
पारा
पीतल
हरितालक
हिङ्गुल
अभ्र
गन्धक
शिलाजतु
गैरिक (गेरि)
खडी
तुत्थ
दार्विका
स्रोतोऽञ्जन
रसाञ्जन
सौवीराञ्जन
धातुमाक्षि
मनछाल
कुसुम्भ
बोल
फेन
सिन्दूर
भूतकेश
पत्तंगा
शोयागा
वंशलोचना
मधु

मोम	चिनी
मड्चाक	फानित
समुद्रासन्नसम्भवलवण	फाटुका
सैन्धवलवण	मिछिरी
साम्भरि लवण	धान्य
विट लवण	शालि
सेचल	षष्टिक
करकच	व्रीहि
सामान्य लवण	श्यामाक
कापोत	कङ्गु
सांचि क्षार	कोद्रव
यवक्षार	रोर
घृत	यव
दुग्ध	गोधूम
नवनीत	छिन्न
हैयङ्गवीन	तोक्म
दधिसर	गन्धविन्ध्न
पेयूष	मटर
मण्ड	सेडडा
दधिकूर्चिका	अरड
तक्रकूर्चिका	मुद्ग
घोल	मासकलाई
कट्वर	छोला
मण्ड	मसूरि
गोमय	वनमुद्ग
करीष	कुलत्थकलाई
घुण्टिक	तिल

सरिषा	कुम्भीर
राजिला	महिलता
मसीना	बृहत्पादी
भङ्गा	जलौका
गडगड्या	झिनुक
पृथिवी	शङ्ख
मृदा	भेक
मृदिनी	गण्डूपदी
उर्वरा	मेघ
क्षारमृत्तिका	शिल
जल	अग्नि
सर्प	वायु
विष	आकाश
विषभेद	समय
मत्स्य	दिन
शकली	रात्रि
गडक	सूर्य
शिशुक	चन्द्र
वोयाल	चन्द्रिका
उलोप	प्रकाश
वानिया गडई	सामान्य मनुष्य
पुँछी	स्त्री
मीनभेद	शरीर
पोना	रुधिर
याद	मांस
कुलीर	मेद
कच्छप	हड्ड

मज्जा	पार्ष्णि
शुक्र	जङ्घा
नाडी	सक्थि
घाटिका	वंक्षण
तिलक	मानचक्रक
गोर्द	अपान
अन्त्र	वस्ति
प्लीहा	कटि
यकृत्	नितम्व
स्नायु	जघन
कोष्ठ	कुकुन्दर
श्लेष्मा	उपस्थ
पित्त	योनि
लाला	शिश्न
दूषिका	मुष्क
रसालि	जठर
पूय	स्तन
मूत्र	आमाशय
पुरीष	चुचुक
कर्पर	आक्रोड
शराव	उरस्
कङ्काल	स्कन्ध
कशेरुका	जत्रुणी
करोटि	कक्षि
पर्शुका	पार्श्व
पद	मध्यक
गुल्फ	वाहु

कफोणि
प्रगण्ड
प्रवेष्ट
करभ
पाणि
तर्जनी
अङ्गुलि
मध्यमा
अनामिका
कनिष्ठा
नख
प्रादेश
वितस्ति
प्रतल
सिंहतल
प्रसृत
अञ्जलि
प्रकोष्ठ
अरत्नि
गज
व्याम
पौरुष
देवतीर्थ
कायतीर्थ
पितृतीर्थ
ब्राह्म
गल
ग्रीवा

मुख
नासिका
ओष्ठाधर
चिवुक
गण्ड
हनु
दन्त
तालु
जिह्वा
सृक्किणी
ललाट
भ्रू
कूर्च
तारका
नेत्र
दृष्टि
अश्रु
अपाङ्ग
कटाक्ष
कर्ण
कर्णपथ
शिरस्
मूर्धा
चिकुर
चूडाल
श्मश्रु
सिंह

व्याघ्र
तरक्षु
शूकर
कपि
भल्लूक
गण्डक
महिष
गज
मदकल
कलभ
उद्भ्रान्त
करिणी
अश्व
आजानेय
विनीत
घोटकविशेष
रथ्य
घोटकी
वृष
वृषविशेष
वत्स
शण्ड
गौ
विशेषवर्णभेद
द्विहायनी
एकहायनी
स्रवद्गर्भा

वेहद्
बालगर्भिणी
वष्कयिणी
धेनु
सुव्रता
पीनोध्नी
द्रोणक्षीरा
समांसमीना
खग
अजा
अज
मेष
सारमेय
कुक्कुर
शृगाल
विडाल
गौधार
शल्य
वातप्रमी
वृक
मृग
ऐणेय
मृगविशेष
उन्दुरु
कृकलास
गृहगोधिका
लूता

कर्णजलौकस्
वृश्चिक
पारावत
शशादन
पेचक
भरद्वाज
खञ्जन
कङ्क
किकीदिवि
चास
धूम्याट
शतपत्रक
दार्वाघाट
चातक
ताम्रचूड
चरणायुध
आत्मघोष
चटक
चाटकैर
चटका
कर्कट
कोकिल
काक
द्रोणकाक
दात्यूह
चिल्ल
कीर

वक
सारस
चक्रवाक
कलहंस
कुरर
हंस
राजहंस
मल्लिका
धार्तराष्ट्र
वराँटा
लक्षणा
जतुका
तैलपायिका
मक्षिका
मधुमक्षिका
पतङ्गिका
वनमक्षिका
दंशी
झिल्लिका
पतङ्ग
खद्योत
भृङ्ग
मयूर
केका
शिखा
पिच्छ
खग

खगविशेष
पक्षमूल
चञ्चु
खगगति
अण्ड
नीड
डिम्भ
युग्म
समूह
यूथ
राशि
कूट
संघ
कुल
पुञ्ज
कापोत
छेक
सुरा
शुण्डा
मधुवार
मध्वासव
शीधु
सन्धान
क्लिन्न
कारोत्तर
आपान

चषक
सरक
काञ्जिक
शुप्त
धान्याम्ल
यवागू
कृशर
पायस
पूप
मत्स्यव्यञ्जन
कलक्
मत्स्यसंतानिक
परिशुष्क
प्रदिग्ध
शूलिक
वेशवार
घृतपूर
संयाव
परिमार्जन
चूलिक
पर्पटी
चुकली
फेनका
असिका
पिड
चूर्ण
वट
लड्डुक

व्यञ्जन
चिडा
भृष्टयव
मुडि
खई
अन्न
दग्धान्न
अन्नादिजनितमण्ड
मुद्गादिजनित रसे
" " यूषे
मासर
रुष्णिका
विलेपी
अन्नजनितद्रवपेया
सिक्थक
सक्तु
पञ्चकषाय
वस्ति
नस्य
रक्तमोक्षण
वमन
विरेचन
भेषज
मुषल
उदूखल
शूर्प
चालनी

हामानदिस्ता
खल
तप्तखल्ल
पाषाण
काचनी
चूला
अङ्गारधानिका
आङ्गारा
भर्जनपात्र
झारी
गाडू
घट
शराव
ऋजीष
कुतू
कुतुप
भाण्ड
दर्वि
रन्ध्र
गर्त्त
यन्त्र
मूषिका
यन्त्रभेद
मूषिकाभेद
तूल
वाँटखरा
पौतव

द्रुवय
पाय्य
लिक्षा
सर्षप
यव
गुञ्जा
माष
शाण
सनिष्कटङ्क
तोलक
सुवर्ण
शुक्ति
मुष्टि
प्रसृति
अञ्जलि
शराव
मानिका
प्रस्थ
आढक
कंस
द्रोण
राशि
सूर्य
गोणी
खारी
तुला

भार
रोग
रोगी
वार्त्त
आरोग्य
चिकित्सा
चिकित्सक
वडि
चूर्ण
चाकि
अनुपान
पथ्य
अपथ्य
त्रिफला
फलत्रय
त्रिमद
त्रिकटु
षडूषण
गन्धत्रिकोलक
चातुर्थक
पञ्चकोल
पञ्चवल्कल
क्षीरिन्
चतुरम्ल

पञ्चाम्ल
पञ्चगव्य
पञ्चनिम्ब
पञ्चपल्लव
पञ्चलवण
पञ्चमूलि
बृहत्पञ्चमूल
तृणाख्यपञ्चमूल
पञ्चकर्म
महाभूत
गुणाः
पञ्चेन्द्रियार्थाः
पञ्चेन्द्रिय
षडङ्ग
प्रत्यङ्ग
सुगन्ध
अष्टमूत्र
त्रिस्नेह
महास्नेह

वेशवार
अष्टवर्ग
सप्तपर्ण
महौषधि
सर्वौषधि
सुरसाष्ट
सर्वगन्ध
यक्षकर्दम
रस
भद्रदार्वादिक
धातु
दोष
मल
वयस्
वायु
पित्त
श्लेष्म
चिकित्सा त्रिविधा

शब्दचन्द्रिकायां वर्णितानां विषयाणामकाराद्यनुक्रमाणिका

शुद्धिपत्रम्

Page	Line	For	Read
९	२	मासका	मालका
,,	३	पक्वकृतशुष:	पक्वकृत्शुष:
,,	७	कलिकाकर:	कलिकारक:
१०	१३	हस्तिशुंडावृक्षे	हातिशुंडावृक्षे
११	३	माध्यं	माघ्यं
,,	१८	भण्डात	चण्डात
१२	६	फणिज्जक:	फणिज्झंक:
१३	२	भोरटा	मोरटा
,,	८	छन्त्रवेशिका	छन्नवेशिका
,,	१५	घृष्यप्रोक्ता	ऋष्यप्रोक्ता
१४	२१	क्लीतलिका	क्लीतकिका
१६	२७	प्रामाद्य	प्रामाद्य
१७	१८	त्रिपुरा	त्रिपुटा
१९	१६	युषा	पुषा
२०	१६	गजयक्ष्मा	गजभक्ष्या
२१	१	त्रिपुरा	त्रिपुटा
२२	१६	सुशीलं	सुशीतं
,,	१७	कालीसक	कालीयक
२३	२०	विहुम	विद्रुम
,,	२१	काव्यजा	कान्यजा
२५	१	पत्रारव्यं	पत्राख्यं
,,	७	चाम्बुण:	चाम्बुप:

२६	९	एला	रास्ना
२९	१४	सभे	समे
३०	२०	सपलारि	सपत्नारि
३२	११	रामहूतिः	रामदूतिः
,,	१९	पितद्विषा	पिनद्विषा
४६	४	वर्षाम्बी	वर्षाभ्वी
,,	८	धन	घन
४९	६	लरलं	तरलं
६३	४	मधे	मद्ये